निःस्नेहाङ्गीं न नवमान्मासात्प्रभृति वासयेत् ।
प्राग्दक्षिणस्तनस्तन्या पूर्वं तत्पार्श्वचेष्टिनी ॥ ६९ ॥
पुन्नामदौर्हृदप्रश्नरता पुंस्वप्नदर्शिनी ।
उन्नते दक्षिणे कुक्षौ गर्भे च परिमण्डले ॥ ७० ॥
पुत्रं सूतेऽन्यथा कन्यां या चेच्छति नृसङ्गतिम् ।
नृत्यवादित्रगान्धर्वगन्धमाल्यप्रिया च या ॥ ७१ ॥
क्लीबं तत्सङ्करे, तत्र मध्यं कुक्षेः समुन्नतम् ।
यमौ पार्श्वद्वयोन्नामात्कुक्षौ द्रोण्यामिव स्थिते ॥ ७२ ॥
प्राक् चैव नवमान्मासात् सा सूतिगृहमाश्रयेत् ।
देशे प्रशस्ते सम्भारैः सम्पन्नं साधकेऽहनि ॥ ७३ ॥
तत्रोदीक्षेत सा सूतिं सूतिकापरिवारिता ।
अद्यश्वःप्रसवे ग्लानिः कुक्ष्यक्षिश्लथता क्लमः ॥ ७४ ॥
अधोगुरुत्वमरुचिः प्रसेको बहुमूत्रता ।
वेदनोरूदरकटीपृष्ठहृद्बस्तिवङ्क्षणे ॥ ७५ ॥
देहनिभेदरुजातोदस्फुरणस्रवणानि च ।
क्लेशवत्नामनु जन्मातस्ततो गर्भोदकस्रुतिः ॥ ७६ ॥
सञ्ज स्थितगर्भां तां कृतकौतुकमङ्गलाम् ।
वृद्धिभिः पुन्नामफलां स्वभ्यक्तोष्णाम्बुसेचिताम् ॥ ७७ ॥
उपविष्घृतां पेयां
१ 'व　　तनौ भूशयने स्थिताम् ।
३ 'हि सः' इति　वे' इति पाठः. २ 'स्वक्तामुष्णाम्बु' इति पाठः.

आभुग्नसक्थिमुत्तानामभ्यक्ताङ्गीं पुनः पुनः ॥ ७८ ॥
अधो नाभेर्विमृद्नीयात्कारयेज्जृम्भचङ्क्रमम् ।
गर्भः प्रयात्यवागेवं, तल्लिङ्गं हृद्विमोक्षतः ॥ ७९ ॥
आविश्य जठरं गर्भो बस्तेरुपरि तिष्ठति ।
आव्योऽभित्वरयन्त्येनां खट्वामारोपयेत्ततः ॥ ८० ॥
अथ सम्पीडिते गर्भे योनिमस्याः प्रसारयेत्[1] ।
मृदु पूर्वं प्रवाहेत बाढमाप्रसवाच्च सा ॥ ८१ ॥
हर्षयेत्तां मुहुः पुत्रजन्मशब्दजलानिलैः ।
प्रत्यायान्ति तथा प्राणाः सूतिक्लेशावसादिताः ॥ ८२ ॥
धूपयेद्गर्भसङ्गे तु योनिं कृष्णाहिकञ्चुकैः ।
हिरण्यपुष्पीमूलं च पाणिपादेन धारयेत् ॥ ८३ ॥
सुवर्चलां विशल्यां वा जरायवपतनेऽपि च ।
कार्यमेतत्तथोत्क्षिप्य[2] बाह्वोरेनां विकम्पयेत् ॥ ८४ ॥
कटीमाकोटयेत्पार्ष्ण्या स्फिजौ गाढं निपीडयेत् ।
तालुकण्ठं स्पृशेद्वेण्या मूर्ध्नि दद्यात्स्नुहीपयः ॥ ८५ ॥
भूर्जलाङ्गलिकीतुम्बीसर्पत्वक्कुष्ठसर्षपैः ।
पृथग्द्वाभ्यां समस्तैर्वा योनिलेपनधूपनम् ॥ ८६ ॥
कुष्ठतालीसकल्कं वा सुरामण्डेन पाययेत् ।
यूषेण वा कुलत्थानां बाल्वजेनासवेन[3] वा ॥ ८७ ॥
शताह्वासर्षपाजाजीशिग्रुतीक्ष्णकचित्रकैः ।

---

१ 'साधयेत्' इति पाठः. २ 'थोत्क्रुष्य' इ[ति पाठः.]
३ 'बिल्व' इति हेमाद्रिः.

सहिङ्गुकुष्ठमदनैर्मूत्रे क्षीरे च सार्षपम् ॥ ८८ ॥
तैलं सिद्धं हितं पायौ योन्यां वाऽप्यनुवासनम् ।
शतपुष्पावचाकुष्ठकणासर्षपकल्कितः ॥ ८९ ॥
निरूहः पातयत्याशु सस्नेहलवणोऽपराम् ।
तत्सङ्गे ह्यनिलो हेतुः सा निर्यात्याशु तज्जयात् ॥ ९० ॥
कुशला पाणिनाऽक्तेन हरेत्कृत्तनखेन वा ।
मुक्तगर्भापरां योनिं तैलेनाङ्गं च मर्दयेत् ॥ ९१ ॥
मक्कल्लाख्ये शिरोबस्तिकोष्ठशूले तु पाययेत् ।
सुचूर्णितं यवक्षारं घृतेनोष्णजलेन वा ॥ ९२ ॥
धान्याम्बु वा गुडव्योषत्रिजातकरजोन्वितम् ।
अथ बालोपचारेण बालं योषिदुपाचरेत् ॥ ९३ ॥
सूतिका क्षुद्वती तैलाद्घृताद्वा महतीं पिबेत् ।
पञ्चकोलकिनीं मात्रामनु चोष्णं गुडोदकम् ॥ ९४ ॥
वातघ्नौषधतोयं वा, तथा वायुर्न कुप्यति ।
विशुध्यति च दुष्टास्रं द्वित्रिरात्रमयं क्रमः ॥ ९५ ॥
दहायोग्या तु निःस्नेहममुमेव विधिं भजेत् ।
स्नेहवत्याश्च जठरं यमकाक्तं विवेष्टयेत् ॥ ९६ ॥
सञ्जस्नाता पिबेत्पेयां पूर्वोक्तौषधसाधिताम् ।
वृद्धिभ्र्ध्वं विदार्यादिवर्गक्वाथेन साधिता ॥ ९७ ॥
उपविष्ट्वागूः स्नेहाढ्या सात्म्यतः पयसाऽथवा ।
१ 'वाऽस्रो' इक्रमशो बृंहणं हितम् ॥ ९८ ॥

३ 'हि सः' इति पठः. २ 'चास्याः', 'वाऽस्याः' इति पाठौ.

द्वादशाहेऽनतिक्रान्ते पिशितं [1]नोपयोजयेत् ।
यत्नेनोपचरेत्सूतां, दुःसाध्यो हि तदामयः ॥ ९९ ॥
गर्भवृद्धिप्रसवरुक्क्लेदास्रस्रुतिपीडनैः ।
एवं च मासादध्यर्धान्मुक्ताहारादियन्त्रणा ॥ १०० ॥
गतसूताभिधाना स्यात्पुनरार्तवदर्शनात् ॥ १००½ ॥"

द्वितीयोऽध्यायः ।

अथातो गर्भव्यापदं शारीरं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥
"गर्भिण्याः परिहार्याणां सेवया रोगतो[2]ऽथ वा ।
पुष्पे दृष्टेऽथवा शूले बाह्यान्तः स्निग्धशीतलम् ॥ १ ॥
सेव्याम्भोजहिमक्षीरिवल्ककल्काज्यलेपितान् ।
धारयेद्योनिबस्तिभ्यामार्द्रार्द्रान् पिचुनक्तकान् ॥ २ ॥
शतधौतघृताक्तां स्त्रीं तदम्भस्यवगाहयेत् ।
ससिताक्षौद्रकुमुदकमलोत्पलकेसरम् ॥ ३ ॥
लिह्यात् क्षीरघृतं खादेच्छृङ्गाटककसेरुकम् ।
निवेत्क्रान्ताब्जशालूकबालोदुम्बरवत्पयः ॥ ४ ॥
श्टतेन शालिकाकोलीद्विबलामधुकेक्षुभिः ।
पयसा रक्तशाल्यन्नमद्यात्समधुशर्करम् ॥ ५ ॥
रसैर्वा जाङ्गलैः

योत्क्रष्य'

---

१ 'नैव योज' इति पाठः. २ 'तोऽपि

शुद्धिवर्जं चास्रोक्तमाचरेत्[1] ।
असम्पूर्णत्रिमासायाः प्रत्याख्याय प्रसाधयेत् ॥ ६ ॥
आमान्वये च
तत्रेष्टं शीतं रूक्षोपसंहितम् ।
उपवासो घनोशीरगुडूच्यरलुधान्यकाः ॥ ७ ॥
दुरालभापर्पटकचन्दनातिविषाबलाः ।
क्वथिताः सलिले पानं तृणधान्यानि[2] भोजनम् ॥ ८ ॥
मुद्गादियूषैरामे तु जिते स्निग्धादि पूर्ववत् ।
गर्भे निपतिते तीक्ष्णं मद्यं सामर्थ्यतः पिबेत् ॥ ९ ॥
गर्भकोष्ठविशुद्ध्यर्थमार्तिविस्मरणाय च ।
लघुना पञ्चमूलेन रूक्षां पेयां ततः पिबेत् ॥ १० ॥
पेयाममद्यपा कल्के साधितां पाञ्चकौलिके ।
बिल्वादिपञ्चकक्वाथे तिलोद्दालकतण्डुलैः ॥ ११ ॥
मासतुल्यदिनान्येवं पेयादिः पतिते क्रमः ।
लघुरस्नेहलवणो दीपनीययुतो हितः[3] ॥ १२ ॥
दोषधातुपरिक्लेदशोषार्थं विधिरित्ययम् ।
स्नेहान्नबस्तयश्चोर्ध्वं बल्यदीपनजीवनाः ॥ १३ ॥
सञ्जातसारे महति गर्भे योनिपरिस्रवात् ।
वृद्धिमप्राप्नुवन् गर्भः कोष्ठे तिष्ठति सस्फुरः ॥ १४ ॥
उपविष्टकमाहुस्तं, वर्धते तेन नोदरम् ।

---

१ 'वाऽस्रो' इति पाठः. २ 'न्यादिभ्यो' इति पाठः.
३ 'हि सः' इति पाठः.

शोकोपवासरूक्षाद्यैरथवा योन्यतिस्रवात् ॥ १५ ॥
वाते क्रुद्धे कृशः शुष्येद्गर्भो नागोदरं तु तम्।
उदरं वृद्धमप्यत्र हीयते स्फुरणं चिरात् ॥ १६ ॥
तयोर्बृंहणवातघ्नमधुरद्रव्यसंस्कृतैः ।
घृतक्षीररसैस्तृप्तिरामगर्भांश्च खादयेत् ॥ १७ ॥
तैरेव च सुभिक्षायाः क्षोभणं यानवाहनैः ।
लीनाख्ये निस्फुरे श्येनगोमत्स्योत्क्रोशबर्हिजाः ॥ १८ ॥
रसा बहुघृता देया माषमूलकजा अपि ।
बालबिल्वं तिलान्माषान्सक्तूंश्च पयसा पिबेत् ॥ १९ ॥
समेद्यमांसं मधु वा कट्वभ्यङ्गं च शीलयेत् ।
हर्षयेत्सततं चैनामेवं गर्भः प्रवर्धते ॥ २० ॥
पुष्टोऽन्यथा वर्षगणैः कृच्छ्राज्जायेत, नैव वा ।
उदावर्तं तु गर्भिण्याः स्नेहैराशुतरां जयेत् ॥ २१ ॥
योग्यैश्च बस्तिभिर्हन्यात्सगर्भां स हि गर्भिणीम् ।
गर्भेऽतिदोषोपचयादपथ्यैर्दैवतोऽपि वा ॥ २२ ॥
मृतेऽन्तरुदरं शीतं स्तब्धं ध्मातं भृशव्यथम् ।
गर्भास्पन्दो भ्रमतृष्णा कृच्छ्रादुच्छ्वसनं क्लमः ॥ २३ ॥
अरतिः स्रस्तनेत्रत्वमावीनामसमुद्भवः ।
तस्याः कोष्णाम्बुसिक्तायाः पिष्ट्वा योनिं प्रलेपयेत् ॥ २४ ॥
गुडं किण्वं सलवणं तथान्तः पूरयेन्मुहुः ।
घृतेन कल्कीकृतया शाल्मल्यतसिपिच्छया ॥ २५ ॥

---

१ 'तत्' इति पाठः. २ 'सुतृप्तायाः' इति पाठः.

मन्त्रैर्योगैर्जरायूक्तैर्मूढगर्भो न चेत्पतेत्।
अथापृच्छयेश्वरं वैद्यो यत्नेनाशु तमाहरेत् ॥ २६ ॥
हस्तमभ्यज्य योनिं च साज्यशाल्मलिपिच्छया।
हस्तेन शक्यं तेनैव
गात्रं च विषमं[1] स्थितम् ॥ २७ ॥

आञ्छनोत्पीडसम्पीडविक्षेपोत्क्षेपणादिभिः।
आनुलोम्य[2] समाकर्षेद्योनिं प्रत्यार्जवागतम् ॥ २८ ॥
हस्तपादशिरोभिर्यो योनिं भुग्नः प्रपद्यते।
पादेन योनिमेकेन भुग्नोऽन्येन गुदं च यः ॥ २९ ॥
विष्कम्भौ नाम तौ मूढौ शस्त्रदारणमर्हतः।
मण्डलाङ्गुलिशस्त्राभ्यां तत्र कर्म प्रशस्यते ॥ ३० ॥
वृद्धिपत्रं हि तीक्ष्णाग्रं न योनाववचारयेत्।
पूर्वं शिरःकपालानि दारयित्वा विशोधयेत् ॥ ३१ ॥
कक्षोरस्तालुचिबुकप्रदेशेऽन्यतमे ततः।
समालम्ब्य दृढं कर्षेत्कुशलो गर्भशङ्कुना ॥ ३२ ॥
अभिन्नशिरसं त्वक्षिकूटयोर्गण्डयोरपि।
बाहुं छित्वांऽससक्तस्य वाताध्मातोदरस्य तु ॥ ३३ ॥
विदार्य कोष्ठमन्त्राणि बहिर्वा सन्निरस्य च।
कटीसक्तस्य तद्वच्च तत्कपालानि दारयेत् ॥ ३४ ॥
यद्यद्वायुवशादङ्गं सज्जेद्गर्भस्य खण्डशः।
तत्तच्छित्वाऽऽहरेत्सम्यग्रक्षेन्नारीं च यत्नतः ॥ ३५ ॥

---

१ 'षमस्थि' इति पाठः. २ 'आनुलोम्ये स' इति पाठः.

गर्भस्य हि गतिं चित्रां करोति विगुणोऽनिलः ।
तत्रानल्पमतिस्तस्मादवस्थापेक्षमाचरेत् ॥ ३६ ॥
छिन्द्याद्गर्भं न जीवन्तं मातरं स हि मारयेत् ।
सहात्मना, न चोपेक्ष्यः क्षणमप्यस्तजीवितः ॥ ३७ ॥
योनिसंवरणभ्रंशमक्कल्लश्वासपीडिताम् ।
पूत्युद्गारां हिमाङ्गीं च मूढगर्भां परित्यजेत् ॥ ३८ ॥
अथापतन्तीमपरां पातयेत्पूर्ववद्भिषक् ।
एवं निर्हृतशल्यां तु सिञ्चेदुष्णेन वारिणा ॥ ३९ ॥
दद्यादभ्यक्तदेहायै योनौ स्नेहपिचुं ततः ।
योनिर्मृदुर्भवेत्तेन शूलं चास्याः प्रशाम्यति ॥ ४० ॥
दीप्यकातिविषारास्नाहिङ्ग्वेलापञ्चकोलकात् ।
चूर्णं स्नेहेन कल्कं वा क्वाथं वा(तां)पाययेत्ततः॥ ४१ ॥
कटुकातिविषापाठाशाकत्वग्घिङ्गुतेजिनीः ।
तद्वच्च दोषस्यन्दार्थं वेदनोपशमाय च ॥ ४२ ॥
त्रिरात्रमेवं, सप्ताहं स्नेहमेव ततः पिबेत् ।
सायं पिबेदरिष्टं च तथा सुकृतमासवम् ॥ ४३ ॥
शिरीषककुभक्वाथपिचून् योनौ विनिक्षिपेत् ।
उपद्रवाश्च येऽन्ये स्युस्तान् यथास्वमुपाचरेत् ॥ ४४ ॥
पयो वातहरैः सिद्धं दशाहं भोजने हितम् ।
रसो दशाहं च परं लघुपथ्याल्पभोजना ॥ ४५ ॥

---

१ 'मष्कल्ल', 'मक्कल', 'मक्कल्ल' इति पाठाः. २ 'तेजनीः' इति पाठः.

स्वेदाभ्यङ्गपरा स्नेहान् बलातैलादिकान् भजेत् ।
ऊर्ध्वं चतुर्भ्यो मासेभ्यः सा क्रमेण सुखानि च ॥ ४६ ॥
बलामूलकषायस्य भागाः षट् पयसस्तथा ।
यवकोलकुलत्थानां दशमूलस्य चैकतः ॥ ४७ ॥
निष्क्वाथभागो भागश्च तैलस्य तु चतुर्दशः ।
द्विमेदादारुमञ्जिष्ठाकाकोलीद्वयचन्दनैः ॥ ४८ ॥
सारिवाकुष्ठतगरजीवकर्षभसैन्धवैः ।
कालानुसार्या[1]शैलेयवचागुरुपुनर्नवैः ॥ ४९ ॥
अश्वगन्धावरीक्षीरशुक्लायष्टीवरारसैः ।
शताह्वाशूर्पपर्ण्येलात्वक्पत्रैः श्लक्ष्णकल्कितैः ॥ ५० ॥
पक्वं मृद्वग्निना तैलं सर्ववातविकारजित् ।
सूतिकाबालमर्मास्थि[2]हतक्षीणेषु पूजितम् ॥ ५१ ॥
ज्वरगुल्मग्रहोन्मादमूत्राघाताऽन्त्रवृद्धिजित् ।
धन्वन्तरेरभिमतं योनिरोगक्षयापहम् ॥ ५२ ॥
बस्तिद्वारे विपन्नायाः कुक्षिः प्रस्पन्दते यदि ।
जन्मकाले ततः शीघ्रं पाटयित्वोद्धरेच्छिशुम् ॥ ५३ ॥
मधुकं शाकबीजं च पयस्या[3] सुरदारु च ।
अश्मन्तकः कृष्णतिलास्ताम्रवल्ली शतावरी ॥ ५४ ॥
वृक्षादनी पयस्या च लता[4] सोत्पलसारिवा ।

---

१ 'सार्यशै', 'सारीशै' इति पाठौ. २ 'स्थिक्षत' इति पाठः. ३ 'स्याऽमर,' इति पाठः. ४ 'ता चोत्पल' इति पाठः.

अनन्ता सारिवा रास्ना पद्मा[1] च मधुयष्टिका ॥ ५५ ॥
बृहतीद्वयकाश्मर्यक्षीरिशुङ्गत्वचा[2] घृतम् ।
पृश्निपर्णी बला शिग्रुः श्वदंष्ट्रा मधुपर्णिका ॥ ५६ ॥
शृङ्गाटकं बिसं द्राक्षा कसेरु मधुकं सिता[3] ।
सप्तैतान् पयसा योगानर्धश्लोकसमापनान् ॥ ५७ ॥
क्रमात्सप्तसु मासेषु गर्भे स्रवति योजयेत् ।
कपित्थबिल्वबृहतीपटोलेक्षुनिदिग्धिकात्[4] ॥ ५८ ॥
मूलैः शृतं प्रयुञ्जीत क्षीरं मासे तथाऽष्टमे ।
नवमे सारिवानन्तापयस्यामधुयष्टिभिः ॥ ५९ ॥
योजयेद्दशमे मासि सिद्धं क्षीरं पयस्यया ।
अथवा यष्टिमधुकनागरामरदारुभिः ॥ ६० ॥

अवस्थितं लोहितमङ्गनाया
वातेन गर्भं ब्रुवतेऽनभिज्ञाः ।
गर्भाकृतित्वात्कटुकोष्णतीक्ष्णैः
स्रुते पुनः केवल एव रक्ते ॥ ६१ ॥
गर्भं जडा भूतहृतं वदन्ति
मूर्तेर्न दृष्टं हरणं यतस्तैः ।
ओजोशनत्वादथवाऽव्यवस्थै-
र्भूतैरुपेक्ष्येत न गर्भमाता ॥ ६२ ॥"

---

१ 'ब्राह्मधु' इति पाठः. २ 'रिश्टङ्ग' इति पाठः. ३ 'वला' इति पाठः. ४ 'ग्धिजैः' इति पाठः.

तृतीयोऽध्यायः ।

अथातोऽङ्गविभागं शारीरं व्याख्यास्यामः ।

इति ह स्माहुरात्रेयादयो महर्षयः ॥

"शिरोऽन्तराधिर्द्वौ बाहू सक्थ्नीति समासतः ।
षडङ्गमङ्गं प्रत्यङ्गं तस्याक्षिहृदयादिकम् ॥ १ ॥
शब्दः स्पर्शश्च रूपं च रसो गन्धः क्रमाद्गुणाः ।
खानिला[1]ग्न्यब्भुवाम्
एकगुणवृद्ध्य[2]न्वयः परे ॥ २ ॥
तत्र खात् खानि देहेऽस्मिन् श्रोत्रं शब्दो विविक्तता ।
वातात्स्पर्शत्वगुच्छ्वासा वह्नेर्दृग्रूपपक्तयः ॥ ३ ॥
आप्या जिह्वारसक्लेदा घ्राणगन्धास्थि पार्थिवम् ।
मृद्वत्र मातृजं रक्तमांसमज्जगुदादिकम् ॥ ४ ॥
पैतृकं तु स्थिरं शुक्रधमन्यस्थिकचादिकम् ।
चै[3]तनं चित्तमक्षाणि नानायोनिषु जन्म च ॥ ५ ॥
सात्म्यजं त्वायुरारोग्यमनालस्यं प्रभा बलम् ।
रसजं वपुषो जन्म वृत्तिर्वृद्धिरलोलता ॥ ६ ॥
सात्विकं शौचमास्तिक्यं शुक्लधर्मरुचिर्मतिः ।
राजसं बहुभाषित्वं मानक्रुद्दम्भमत्सरम् ॥ ७ ॥
तामसं भयमज्ञानं निद्राऽऽलस्यं विषादिता ।
इति भूतमयो देहः
तत्र सप्त त्वचोऽसृजः ॥ ८ ॥

१ 'लाद्यम्बुभूष्वेकं' पा. २ 'वृध्याऽन्वयः' पा. ३ 'आत्मजं चि' पा.

पच्यमानात्प्रजायन्ते क्षीरात्सन्तानिका इव ।
धात्वाशयान्तरक्लेदो विपक्वः स्वंस्वमूष्मणा ॥ ९ ॥
श्लेष्मस्नाय्वपराच्छन्नः कलाख्यः काष्ठसारवत् ।
ताः सप्त

सप्त चाधारा रक्तस्याद्यः[1] क्रमात् परे ॥ १० ॥
कफामपित्तपक्वानां वायोर्मूत्रस्य च स्मृताः ।
गर्भाशयोऽष्टमः स्त्रीणां पित्तपक्वाशयान्तरे ॥ ११ ॥
कोष्ठाङ्गानि स्थितान्येषु हृदयं क्लोम फुप्फुसम् ।
यकृत्प्लीहोन्दुकं वृक्कौ नाभिडिम्भान्त्रबस्तयः ॥ १२ ॥
दश जीवितधामानि शिरोरसनबन्धनम् ।
कण्ठोऽस्रं हृदयं नाभिर्बस्तिः शुक्रौजसी गुदम् ॥ १३ ॥
जालानि कण्डराश्चाङ्गे पृथक् षोडश निर्दिशेत् ।
षट् कूर्चाः सप्त सीवन्यो[2] मेढ्रजिह्वाशिरोगताः ॥ १४ ॥
[3]शस्त्रेण ताः परिहरेच्चतस्रो मांसरज्जवः ।
चतुर्दशास्थिसङ्घाताः, सीमन्ता द्विगुणा नव ॥ १५ ॥
अस्थ्नां शतानि षष्टिश्च[4] त्रीणि दन्तनखैः सह ।
धन्वन्तरिस्तु त्रीण्याह, सन्धीनां च शतद्वयम् ॥ १६ ॥
दशोत्तरं

सहस्रे द्वे निजगादात्रिनन्दनः ।

---

१ 'स्याधः क्र' इति पाठः. २ 'सेवन्यो' 'सेविन्यो' इति पाठौ. ३ 'शस्त्रेणैताः' इति पाठः. ४ 'षष्ठीनि त्री' इति पाठः.

स्नाव्नां नवशती

पञ्च पुंसां पेशीशतानि तु ॥ १७ ॥
अधिका विंशतिः स्त्रीणां योनिस्तनसमाश्रिताः ।
दश मूलसिरा हृत्स्थास्ताः सर्वं सर्वतो वपुः ॥ १८ ॥
रसात्मकं वहन्त्योजस्तन्निबद्धं हि चेष्टितम् ।
स्थूलमूलाः सुसूक्ष्माग्राः पत्ररेखाप्रतानवत् ॥ १९ ॥
भिद्यन्ते तास्ततः सप्तशतान्यासां भवन्ति तु ।
तत्रैकैकं[2] च शाखायां शतं, तस्मिन्न वेधयेत् ॥ २० ॥
सिरां जालन्धरां नाम तिस्रश्चाभ्यन्तराश्रिताः ।
षोडशद्विगुणाः श्रोण्यां, तासां द्वे द्वे तु वङ्क्षणे ॥ २१ ॥
द्वे द्वे कटिकतरुणे शस्त्रेणाष्टौ स्पृशेन्न ताः ।
पार्श्वयोः षोडशैकैकामूर्ध्वगां वर्जयेत्तयोः[3] ॥ २२ ॥
द्वादशद्विगुणाः पृष्ठे पृष्ठवंशस्य पार्श्वयोः[4] ।
द्वे द्वे तत्रोर्ध्वगामिन्यौ न शस्त्रेण परामृशेत् ॥ २३ ॥
पृष्ठवज्जठरे तासां मेहनस्योपरि स्थिते ।
रोमराजीमुभयतो द्वे द्वे शस्त्रेण न स्पृशेत् ॥ २४ ॥
चत्वारिंशदुरस्यासां चतुर्दश न वेधयेत् ।
स्तनरोहिततन्मूलहृदये तु पृथग्द्वयम् ॥ २५ ॥
अपस्तम्भाख्ययोरेकां तथाऽपालापयोरपि ।
ग्रीवायां पृष्ठवत्तासां नीले मन्ये कृकाटिके ॥ २६ ॥

---

१ 'स्नायोर्नव' इति पाठः. २ 'कैकत्र शा' इति पाठः.
३ 'येत्सिराम्' इति पाठः. ४ 'पार्श्वगे' इति पाठः.

विधुरे मातृकाश्चाष्टौ षोडशेति[1] परित्यजेत् ।
हन्वोः षोडश, तासां द्वे सन्धिबन्धनकर्मणी ॥ २७ ॥
जिह्वायां हनुवत्तासामधो द्वे रसबोधने ।
द्वे च वाचःप्रवर्तिन्यौ

नासायां चतुरुत्तरा ॥ २८ ॥
विंशतिर्गन्धवेदिन्यौ तासामेकां च तालुगाम् ।
षट्पञ्चाशन्नयनयोर्निमेषोन्मेषकर्मणी ॥ २९ ॥
द्वे द्वे, अपाङ्गयोर्द्वे च तासां षडिति वर्जयेत् ।
नासानेत्राश्रिताः षष्टिर्ललाटे, स्थपनीश्रिताम् ॥ ३० ॥
तत्रैकां, द्वे तथाऽऽवर्तौ, चतस्रश्च कचान्तगाः ।
सप्तैवं वर्जयेत्तासाम्

कर्णयोः षोडशात्र तु ॥ ३१ ॥
द्वे शब्दबोधने शङ्खौ सिरास्ता एव चाश्रिताः ।
द्वे शङ्खसन्धिगे तासाम्

मूर्ध्नि द्वादश तत्र तु ॥ ३२ ॥
एकैकां पृथगुत्क्षेपसीमन्ताधिपतिस्थिताम् ।
इत्यवेध्यविभागार्थं प्रत्यङ्गं वर्णिताः सिराः ॥ ३३ ॥
अवेध्यास्तत्र कार्त्स्न्येन देहेऽष्टानवतिस्तथा ।
सङ्कीर्णा ग्रथिताः क्षुद्रा वक्राः सन्धिषु चाश्रिताः ॥३४॥
तासां शतानां सप्तानां पादोऽस्त्रं वहते पृथक् ।
वातपित्तकफैर्जुष्टं शुद्धं चैवं स्थिता मलाः ॥ ३५ ॥

---

१ 'डशैता प' इति पाठः.

शरीरमनुगृह्णन्ति पीडयन्त्यन्यथा पुनः ।
तत्र श्यावारुणाः सूक्ष्माः पूर्णरिक्ताः क्षणात्सिराः ॥ ३६ ॥
प्रस्पन्दिन्यश्च वातास्त्रं वहन्ते
पित्तशोणितम् ।
स्पर्शोष्णाः शीघ्रवाहिन्यो नीलपीताः
कफं पुनः ॥ ३७ ॥
गौर्यः स्निग्धाः स्थिराः शीताः
संसृष्टं लिङ्गसङ्करे ।
गूढाः समस्थिताः स्निग्धा रोहिण्यः शुद्धशोणितम् ॥३८॥
धमन्यो नाभिसम्बद्धा विंशतिश्चतुरुत्तरा ।
ताभिः परिवृता नाभिश्चक्रनाभिरिवारकैः ॥ ३९ ॥
ताभिश्चोर्ध्वमधस्तिर्यग्देहोऽयमनुगृह्यते ।
स्रोतांसि नासिके कर्णौ नेत्रे पाय्वास्यमेहनम् ॥ ४० ॥
स्तनौ रक्तपथश्चेति नारीणामधिकं त्रयम् ।
जीवितायतनान्यन्तः स्रोतांस्याहुस्त्रयोदश ॥ ४१ ॥
प्राणधातुमलाम्भोन्नवाहीनि
अहितसेवनात् ।
तानि दुष्टानि रोगाय, विशुद्धानि सुखाय च ॥ ४२ ॥
स्वधातुसमवर्णानि वृत्तस्थूलान्यणूनि च ।
स्रोतांसि दीर्घाण्याकृत्या प्रतानसदृशानि च ॥ ४३ ॥
आहारश्च विहारश्च यः स्याद्दोषगुणैः समः ।

---

१ 'वृतो' इति पाठः.

धातुभिर्विगुणो यश्च स्रोतसां स प्रदूषकः ॥ ४४ ॥
अतिप्रवृत्तिः सङ्गो वा सिराणां ग्रन्थयोऽपि वा ।
विमार्गतो वा गमनं स्रोतसां दु[२]ष्टिलक्षणम् ॥ ४५ ॥
बिसानामिव सूक्ष्माणि दूरं प्रविसृतानि च ।
द्वाराणि स्रोतसां देहे रसो यैरुपचीयते ॥ ४६ ॥
व्यधे तु स्रोतसां मोहकम्पाध्मानवमिज्वराः ।
प्रलापशूलविण्मूत्ररोधा मरणमेव वा ॥ ४७ ॥
स्रोतोविद्धमतो वैद्यः प्रत्याख्याय प्रसाधयेत् ।
उद्धृत्य शल्यं यत्नेन सद्यःक्षतविधानतः ॥ ४८ ॥
अन्नस्य पक्ता पित्तं तु पाचकाख्यं पुरेरितम् ।
दोषधातुमलादीनामूष्मेत्यात्रेयशासनम् ॥ ४९ ॥
"वामपार्श्वाश्रितं नाभेः किंचित्सूर्यस्य मण्डलम् ।
तन्मध्ये मण्डलं सौम्यं तन्मध्येऽग्निर्व्यवस्थितः ॥
जरायुमात्रप्रच्छन्नः काचकोशस्थदीपवत् ।"
तदधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता ।
सैव धन्वन्तरिमते कला पित्तधराह्वया ॥ ५० ॥
आयुरारोग्यवीर्यौजोभूतधात्वग्निपुष्टये ।
स्थिता पक्वाशयद्वारि भुक्तमार्गार्गलेव [२]सा ॥ ५१ ॥
भुक्तमामाशये रुध्वा सा विपाच्य नयत्यधः ।
बलवत्यबला त्वन्नमाममेव विमुञ्चति ॥ ५२ ॥
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीबलः ।

---

२ 'दुष्टल' इति पाठः. २ 'या' इति पाठः.

दूषितेऽग्नावतो दुष्टा ग्रहणी रोगकारिणी ॥ ५३ ॥
यदन्नं देहधात्वोजोबलवर्णादिपोषणम् ।
तत्राग्निर्हेतुराहारान्न ह्यपक्वाद्रसादयः ॥ ५४ ॥
अन्नं कालेऽभ्यवहृतं कोष्ठं[1] प्राणानिलाहृतम् ।
द्रवैर्विभिन्नसङ्घातं नीतं स्नेहेन मार्दवम् ॥ ५५ ॥
सन्धुक्षितः समानेन पचत्यामाशयस्थितम् ।
औदर्योऽग्निर्यथा बाह्यः स्थालीस्थं तोयतण्डुलम् ॥ ५६ ॥
आदौ षड्रसमप्यन्नं मधुरीभूतमीरयेत् ।
[2]फेनीभूतं कफं, यातं विदाहादम्लतां ततः ॥ ५७ ॥
पित्तमामाशयात्कुर्याच्च्यवमानं, च्युतं पुनः ।
अग्निना शोषितं पक्वं पिण्डितं कटु मारुतम् ॥ ५८ ॥
भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।
पञ्चाहारगुणान्स्वान् स्वान् पार्थिवादीन् पचन्त्यनु ॥ ५९ ॥
यथास्वं ते च पुष्णन्ति[3] पक्वा भूतगुणान् पृथक् ।
पार्थिवाः पार्थिवानेव शेषाः शेषांश्च देहगान् ॥ ६० ॥
किट्टं सारश्च[4] तत्पक्वमन्नं सम्भवति द्विधा ।
तत्राच्छं किट्टमन्नस्य मूत्रं विद्याद्घनं शकृत् ॥ ६१ ॥
सारस्तु सप्तभिर्भूयो यथास्वं पच्यतेऽग्निभिः ।
रसाद्रक्तं ततो मांसं मांसान्मेदस्ततोऽस्थि[5] च ॥ ६२ ॥
अस्थ्नो मज्जा ततः शुक्रं शुक्राद्गर्भः प्रजायते[6] ।

---

१ 'कोष्ठे' इति पा. २ 'फेनभूतं' इति पा. ३ 'पुष्यन्ति' पा. ४'रस्तथा पक्व' पा. ५'मेदोऽस्थि मेदसः' पा. ६'प्रसादजः' पा.

कफः पित्तं मलाः[1] खेषु प्रस्वेदो नखरोम च ॥ ६३ ॥
स्नेहोऽक्षित्वग्विशामोजो धातूनां क्रमशो मलाः ।
प्रसादकिट्टौ धातूनां पाकादेवं द्विधर्च्छतः ॥ ६४ ॥
परस्परोपसंस्तम्भाद्धातु[2]स्नेहपरम्परा ।
केचिदाहुरहोरात्रात्षडहादपरे, परे ॥ ६५ ॥
[3]मासेन याति शुक्रत्वमन्नं पाकक्रमादि[4]भिः ।
[5]सन्तता भोज्यधातूनां परिवृत्तिस्तु चक्रवत् ॥ ६६ ॥
वृष्यादीनि [6]प्रभावेण सद्यः शुक्रादि[7] कुर्वते ।
प्रायः करोत्यहोरात्रात्कर्मान्यदपि भेषजम् ॥ ६७ ॥
व्यानेन रसधातुर्हि विक्षेपोचितकर्मणा ।
युगपत्सर्वतोऽजस्रं देहे विक्षिप्यते सदा ॥ ६८ ॥
क्षिप्यमाणः खवैगुण्याद्रसः सज्जति यत्र सः ।
तस्मिन्विकारं कुरुते खे वर्षमिव तोयदः ॥ ६९ ॥
दोषाणामपि चैवं स्यादेकदेशप्रकोपणम् ।
अन्नभौतिकधात्वग्निकर्मेति परिभाषितम् ॥ ७० ॥
अन्नस्य पक्ता सर्वेषां पक्तॄणामधिको मतः ।
तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः ॥ ७१ ॥
तस्मात्तं विधिवद्युक्तैरन्नपानेन्धनैर्हितैः ।
पालयेत्प्रयतस्तस्य स्थितौ ह्यायुर्बलस्थितिः ॥ ७२ ॥

---

१ 'मलः' इत्यरुणः. २ 'म्भा धातु' इति पाठः. ३ 'मासात्प्रयाति' इति पाठः. ४ 'मादिति' इति पाठः. ५ 'सन्तत्या' इति पाठः. ६ 'प्रभावात्तु' पाठः. ७ 'शुक्रं प्रकु' पाठः.

समः समाने स्थानस्थे विषमोऽग्निर्विमार्गगे ।
पित्ताभिमूर्च्छिते तीक्ष्णो मन्दोऽस्मिन्कफपीडिते ॥ ७३ ॥
समोऽग्निर्विषमस्तीक्ष्णो मन्दश्चैवं चतुर्विधः ।
यः पचेत्सम्यगेवान्नं भुक्तं सम्यक् समस्त्वसौ[1] ॥ ७४ ॥
विषमोऽसम्यगप्याशु[2] सम्यग्वाऽपि चिरात्पचेत् ।
तीक्ष्णो वह्निः पचेच्छीघ्रमसम्यगपि भोजनम् ॥ ७५ ॥
मन्दस्तु सम्यगप्यन्नमुपयुक्तं[3] चिरात्पचेत् ।
कृत्वाऽऽस्यशोषाटोपान्त्रकूजनाध्मानगौरवम् ॥ ७६ ॥
"शान्तेऽग्नौ म्रियते, युक्ते चिरं जीवत्यनामयः ।
रोगी स्याद्विकृते, मूलमग्निस्तस्मान्निरुच्यते ॥"
सहजं कालजं युक्तिकृतं देहबलं त्रिधा ।
तत्र सत्त्वशरीरोत्थं प्राकृतं सहजं बलम् ॥ ७७ ॥
वयस्कृतमृतूत्थं च कालजं, युक्तिजं पुनः ।
विहाराहारजनितं तथोर्जस्करयोगजम् ॥ ७८ ॥
देशोऽल्पवारिद्रुनगो जाङ्गलः स्वल्परोगदः ।
आनूपो विपरीतोऽस्मात्समः साधारणः स्मृतः ॥ ७९ ॥
मज्जमेदोवसामूत्रपित्तश्लेष्मशकृन्त्यसृक् ।
रसो जलं च देहेऽस्मिन्नेकैकाञ्जलिवर्धितम् ॥ ८० ॥
पृथक् स्वप्रसृतं प्रोक्तमोजोमस्तिष्करेतसाम् ।
द्वावञ्जली तु स्तन्यस्य चत्वारो रजसः स्त्रियाः ॥ ८१ ॥

१ 'समस्तु सः' अरुणः. २ 'म्यगेवाशु सम्यगेव चि' इति पाठः. ३ 'प्रभुक्तं' इति पाठः.

समधातोरिदं मानं विद्याद्वृद्धिक्षयावतः ॥ ८२ ॥
शुक्रासृग्गर्भिणीभोज्यचेष्टागर्भाशयर्तुषु ।
यः स्याद्दोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता ॥ ८३ ॥
विभुत्वादाशुकारित्वाद्बलित्वादन्यकोपनात् ।
स्वातन्त्र्याद्बहुरोगत्वाद्दोषाणां प्रबलोऽनिलः ॥ ८४ ॥

प्रायोऽत एव पवनाध्युषिता मनुष्या
दोषात्मकाः स्फुटितधूसरकेशगात्राः ।
शीतद्विषश्चलधृतिस्मृतिबुद्धिचेष्टा-
सौहार्ददृष्टिगतयोऽतिबहुप्रलापाः ॥ ८५ ॥
अल्प[1]वित्त[2]बलजीवितनिद्राः
सन्नसक्तचलजर्जरवाचः ।
नास्तिका बहुभुजः सविलासा
गीतहासमृगयाकलिलोलाः ॥ ८६ ॥
मधुराम्लपटूष्णसात्म्यकाङ्क्षाः
कृशदीर्घाकृतयः सशब्दया[3]ताः ।
न दृढा न जितेन्द्रिया न चार्या
न च कान्तादयिता बहुप्रजा वा ॥ ८७ ॥
नेत्राणि [4]चैषां खरधूसराणि
वृत्तान्यचारूणि मृतोपमानि ।

---

१ 'ल्पपित्त' इति पाठः. २ 'त्तकफजी' इति पाठः ३ 'याना' इति पा. ४ 'वैषां' इति पाठः.

उन्मीलितानीव भवन्ति सुप्ते
शैलद्रुमांस्ते गगनं च यान्ति ॥ ८८ ॥
अधन्या मत्सराध्माताः स्तेनाः [1]प्रोद्बद्धपिण्डिकाः ।
श्वशृगालोष्ट्रगृध्राखुकाकानूकाश्च वातिकाः ॥ ८९ ॥
पित्तं वह्निर्वह्निजं वा यदस्मा-
त्पित्तोद्रिक्त[2]स्तीक्ष्णतृष्णाबुभुक्षः ।
गौरोष्णाङ्गस्ताम्रहस्ताङ्घ्रिवक्त्रः
शूरो मानी पिङ्गकेशोऽल्परोमा ॥ ९० ॥
दयितमाल्यविलेपनमण्डनः
सुचरितः शुचिराश्रितवत्सलः ।
विभवसाहसबुद्धिबलान्वितो
भवति भीषु गतिर्द्विषतामपि ॥ ९१ ॥
मेधावी प्रशिथिलसन्धिबन्धमांसो
नारीणामनभिमतोऽल्पशुक्रकामः ।
आवासः पलिततरङ्गनीलिकानां
भुङ्क्तेऽन्नं मधुरकषायतिक्तशीतम् ॥ ९२ ॥
घर्मद्वेषी स्वेदनः पूतिगन्धि-
र्भूर्युच्चारक्रोधपानाशनेर्ष्यः ।
सुप्तः पश्येत्कर्णिकारान्पलाशान्
दिग्दाहोल्काविद्युदर्कानलांश्च ॥ ९३ ॥

---

१ 'प्रोद्वृत्तपि' इति पाठः.　　२ 'स्तीव्रतृ' इति पाठः.

तनूनि पिङ्गानि चलानि चैषां[1]
तन्वल्पपक्ष्माणि हिमप्रियाणि ।
क्रोधेन मद्येन रवेश्च भासा
रागं व्रजन्त्याशु विलोचनानि ॥ ९४ ॥

मध्यायुषो मध्यबलाः पण्डिताः क्लेशभीरवः ।
व्याघ्रर्क्षकपिमार्जार[2]यक्षानूकाश्च पैत्तिकाः ॥ ९५ ॥

श्लेष्मा सोमः श्लेष्मलस्तेन सौम्यो
गूढस्निग्धश्लिष्टसन्ध्यस्थिमांसः ।
क्षुत्तृड्दुःखक्लेशघर्मैरतप्तो
बुद्ध्या युक्तः सात्विकः सत्यसन्धः ॥ ९६ ॥

प्रियङ्गुदूर्वाशरकाण्डशस्त्र-
गोरोचनापद्मसुवर्णवर्णः ।
प्रलम्बबाहुः पृथुपीनवक्षा
महाललाटो घननीलकेशः ॥ ९७ ॥

मृद्वङ्गः समसुविभक्तचारु[3]देहो
बह्वोजोरतिरसशुक्रपुत्रभृत्यः ।
धर्मात्मा वदति न निष्ठुरं च जातु
प्रच्छन्नं वहति दृढं चिरं च वैरम् ॥ ९८ ॥

समदद्विरदेन्द्रतुल्यया[4]तो
जलदाम्भोधिमृदङ्ग[5]सिंहघोषः ।

---

१ 'वैषां' इति पाठः. २ 'रवृकानु' इति पाठः ३ 'रुवष्मा' इति पाठः. ४ 'यानो' इति पाठः. ५ 'ङ्गशङ्खघो' इति पाठः.

स्मृतिमानभियोगवान् विनीतो
न च बाल्येऽप्यतिरोदनो न लोलः ॥ ९९ ॥
तिक्तं कषायं कटुकोष्णरूक्ष-
मल्पं स भुङ्क्ते बलवांस्तथाऽपि ।
रक्तान्तसुस्निग्धविशालदीर्घ-
सुव्यक्तशुक्लासितपक्ष्मलाक्षः ॥ १०० ॥
अल्पव्याहारक्रोधपानाशनेहः[1]
प्राज्यायुर्वित्तो[2] दीर्घदर्शी वदान्यः ।
श्राद्धो गम्भीरः स्थूललक्षः[3] क्षमावा-
नार्यो निद्रालुर्दीर्घसूत्रः[4] कृतज्ञः ॥ १०१ ॥
ऋजुर्विपश्चित्सुभगः सुलज्जो[5]
भक्तो गुरूणां स्थिरसौहृदश्च[6] ।
स्वप्ने सपद्मान्सविहङ्गमालां-
स्तोयाशयान् पश्यति तोयदांश्च ॥ १०२ ॥
ब्रह्मरुद्रेन्द्रवरुणतार्क्ष्यहंसगजाधिपैः ।
श्लेष्मप्रकृतयस्तुल्यास्तथा सिंहाश्वगोवृषैः ॥ १०३ ॥
प्रकृतीर्द्वयसर्वोत्था द्वन्द्वसर्वगुणोदये ।
शौचास्तिक्यादिभिश्चैवं गुणैर्गुणमयीर्वदेत् ॥ १०४ ॥
वयस्त्वाषोडशाद्बालं तत्र धात्विन्द्रियौजसाम् ।
वृद्धिरासप्ततेर्मध्यं तत्रावृद्धिः परं क्षयः ॥ १०५ ॥

---

१ 'नेर्ष्यः' इति पा. २ युर्युक्तो दी' इति पा. ३ 'लक्ष्यः' पा. ४ 'सूत्री' पाठः. ५ 'सलज्जो' पा. ६ 'सौहृदय्यः' पा.

स्वं स्वं हस्तत्रयं सार्धं वपुः पात्रं सुखायुषोः ।
न च यद्युक्तमुद्रिक्तैरष्टाभिर्निन्दितैर्निजैः ॥ १०६ ॥
अरोमशासितस्थूलदीर्घत्वैः सविपर्ययैः ।
सुस्निग्धा मृदवः सूक्ष्मा नैकमूलाः स्थिराः कचाः ॥
ललाटमुन्नतं श्लिष्टशङ्खमर्धेन्दुसन्निभम् ।
कर्णौ नीचोन्नतौ पश्चान्महान्तौ श्लिष्टमांसलौ ॥ १०८ ॥
नेत्रे व्यक्तासितसिते सुबद्धघनपक्ष्मणी ।
उन्नताग्रा महोच्छ्वासा पीनर्जुर्नासिका समा ॥ १०९ ॥
ओष्ठौ रक्तावनुद्वृत्तौ, महत्यौ नोल्बणे हनू ।
महदास्यं, घना दन्ताः स्निग्धाः श्लक्ष्णाः सिताः समाः ११०
जिह्वा रक्ताऽऽयता तन्वी, मासलं चिबुकं महत् ।
ग्रीवा ह्रस्वा घना वृत्ता, स्कन्धावुन्नतपीवरौ ॥ १११ ॥
उदरं दक्षिणावर्तगूढनाभि समुन्नतम् ।
तनुरक्तोन्नतनखं स्निग्धमाताम्रमांसलम् ॥ ११२ ॥
दीर्घाच्छिद्राङ्गुलि महत्पाणिपादं प्रतिष्ठितम् ।
गूढवंशं बृहत्पृष्ठं[1], निगूढाः सन्धयो दृढाः ॥ ११३ ॥
धीरः स्वरोऽनुनादी च, वर्णः स्निग्धः स्थिरप्रभः ।
स्वभावजं स्थिरं सत्त्वमविकारि विपत्स्वपि ॥ ११४ ॥
उत्तरोत्तरसुक्षेत्रं[2] वपुर्गर्भादिनीरुजम् ।
आयामज्ञानविज्ञानैर्वर्धमानं शनैः शुभम् ॥ ११५ ॥
इति सर्वगुणोपेते शरीरे शरदां शतम् ।

---

१ 'महत्पृष्ठं' इति पाठः. २ 'त्रं गर्भात्प्रभृति नी' पाठः.

आयुरैश्वर्यमिष्टाश्च सर्वे भावाः प्रतिष्ठिताः ॥ ११६ ॥
त्वग्रक्तादीनि सत्त्वान्तान्यग्र्याण्यष्टौ यथोत्तरम्।
बलप्रमाणज्ञानार्थं साराण्युक्तानि देहिनाम् ॥ ११७ ॥
सारैरुपेतः सर्वैः स्यात्परं गौरवसंयुतः ।
सर्वारम्भेषु चाशावान्सहिष्णुः सन्मतिः स्थिरः ॥ ११८ ॥
अनुत्सेकमदैन्यं च सुखं दुःखं च सेवते ।
सत्त्ववांस्तप्यमानस्तु राजसो नैव तामसः ॥ ११९ ॥
दानशीलदयासत्यब्रह्मचर्यकृतज्ञताः ।
रसायनानि मैत्री च पुण्यायुर्वृद्धिकृद्गणः ॥ १२० ॥"

चतुर्थोऽध्यायः ।

अथातो मर्मविभागं शारीरं व्याख्यास्यामः ॥
इति ह स्माहुरात्रेयादयो महर्षयः ॥
"सप्तोत्तरं मर्मशतम्
तेषामेकादशादिशेत् ।
पृथक्सक्थ्नोस्तथा बाह्वोस्त्रीणि कोष्ठे नवोरसि ॥ १ ॥
पृष्ठे चतुर्दशोर्ध्वं तु जत्रोस्त्रिंशच्च सप्त च ।
मध्ये पादतलस्याहुरभितो मध्यमाङ्गुलिम् ॥ २ ॥
तलहृन्नाम रुजया तत्र विद्धस्य पञ्चता ।
अङ्गुष्ठाङ्गुलिमध्यस्थं क्षिप्रमाक्षेपमारणम् ॥ ३ ॥
तस्योर्ध्वं द्व्यङ्गुले कूर्चः पादभ्रमणकम्पकृत् ।

---

१ 'न्यग्राण्य' इति चन्द्रः. २ 'स्तभ्यमान' इति चन्द्रः.

गुल्फसन्धेरधः कूर्चशिरःशोफरुजाकरम् ॥ ४ ॥
जङ्घाचरणयोः सन्धौ गुल्फो रुक्स्तम्भमान्द्यकृत्[1]।
जङ्घान्तरे त्विन्द्रबस्तिर्मारयत्यसृजः क्षयात् ॥ ५ ॥
जङ्घोर्वोः सङ्गमे जानु खञ्जता तत्र जीवतः ।
जानुनरूयङ्गुलादूर्ध्वमाण्यूरुस्तम्भशोफकृत् ॥ ६ ॥
उर्व्यूरुमध्ये तद्वेधात्सक्थिशोषोऽस्रसङ्क्षयात् ।
ऊरुमूले लोहिताक्षं[2] हन्ति पक्षमसृक्क्षयात् ॥ ७ ॥
मुष्कवङ्क्षणयोर्मध्ये विटपं[3] षण्ढताकरम् ।
इति सक्थ्नोस्तथा बाह्वोर्मणिबन्धोऽत्र गुल्फवत् ॥ ८ ॥
कूर्परं जानुवत्कौण्यं तयोर्विटपवत्पुनः ।
कक्षाक्षमध्ये कक्षाधृक् कुणित्वं तत्र जायते ॥ ९ ॥
स्थूलान्त्रबद्धः सद्योघ्नो विड्वातवमनो गुदः ।
मूत्राशयो धनुर्वक्रो बस्तिरल्पास्रमांसगः ॥ १० ॥
एकाधोवदनो मध्ये कट्याः सद्यो निहन्त्यसून् ।
ऋतेऽश्मरीव्रणाद्विद्धस्तत्राप्युभयतश्च सः[4] ॥ ११ ॥
मूत्रस्राव्येकतो भिन्ने व्रणो रोहेच्च यत्नतः ।
देहामपक्वस्थानानां मध्ये सर्वसिराश्रयः ॥ १२ ॥
नाभिः, सोऽपि हि सद्योघ्नो
द्वारमामाशयस्य च ।
सत्वादिधाम हृदयं स्तनोरःकोष्ठमध्यगम् ॥ १३ ॥

---

१ 'म्भशाण्ढ्यकृत्', 'म्भजाड्यकृत्' 'म्भखाञ्जयकृत्' पाठाः
२ 'ताख्यं' पा. ३ 'विटिपं' इति चन्द्रः. ४ 'यः' चन्द्रः.

स्तनरोहितमूलाख्ये द्व्यङ्गुले स्तनयोर्वदेत्।
ऊर्ध्वाधोऽस्रकफापूर्णकोष्ठो नश्येत्तयोः क्रमात् ॥ १४ ॥
अपस्तम्भावुरःपार्श्वे नाड्यावनिलवाहिनी।
रक्तेन[1] पूर्णकोष्ठोऽत्र श्वासात्कासाच्च नश्यति ॥ १५ ॥
पृष्ठवंशोरसोर्मध्ये तयोरेव च पार्श्वयोः।
अधोंऽसकूटयोर्विद्यादपालापाख्यमर्मणी ॥ १६ ॥
तयोः कोष्ठेऽसृजा पूर्णे नश्येद्यातेन पूयताम्।
पार्श्वयोः पृष्ठवंशस्य श्रोणीकर्णौ प्रति[2] स्थिते ॥ १७ ॥
वंशाश्रिते स्फिजोरूर्ध्वं कटीकतरुणे स्मृते।
तत्र रक्तक्षयात्पाण्डुर्हीनरूपो विनश्यति ॥ १८ ॥
पृष्ठवंशं[3] ह्युभयतो यौ सन्धी कटिपार्श्वयोः।
जघनस्य बहिर्भागे मर्मणी तौ कुकुन्दरौ ॥ १९ ॥
चेष्टाहानिरधःकाये स्पर्शाज्ञानं च तद्व्यधात्।
पार्श्वान्तरनिबद्धौ यावुपरि श्रोणिकर्णयोः ॥ २० ॥
आशय[4]च्छादनौ तौ तु नितम्बौ तरुणास्थिगौ।
अधःशरीरे शोफोऽत्र दौर्बल्यं मरणं ततः ॥ २१ ॥
पार्श्वान्तरनिबद्धौ च मध्ये जघनपार्श्वयोः।
तिर्यगूर्ध्वं च निर्दिष्टौ पार्श्वसन्धी तयोर्व्यधात् ॥ २२ ॥
रक्तपूरितकोष्ठस्य शरीरान्तरसम्भवः।
स्तनमूलार्जवे भागे पृष्ठवंशाश्रये सिरे ॥ २३ ॥

---

१ 'रक्तस्य पू' इति पाठः. २ 'प्रतिष्ठितौ', 'कर्णप्रतिष्ठिते' इति क्वचित्। ३ 'वंशस्युभ' इति पाठः. ४ 'शयाच्छा' पाठः.

बृहत्यौ, तत्र विद्धस्य मरणं रक्तसङ्क्षयात्।
बाहुमूलाभिसम्बद्धे पृष्ठवंशस्य पार्श्वयोः ॥ २४ ॥
अंसयोः फलके बाहुस्वापशोषौ[1] तयोर्व्यधात्[2]।
ग्रीवामुभयतः स्नाव्नी ग्रीवाबाहुशिरोन्तरे ॥ २५ ॥
स्कन्धांसपीठसम्बन्धावंसौ[3] बाहुक्रियाहरौ।
कण्ठनाडीमुभयतः सिरा हनुसमाश्रिताः ॥ २६ ॥
चतस्रस्तासु नीले द्वे मन्ये द्वे मर्मणी स्मृते।
स्वरप्रणाशवैकृत्यं[4] रसाज्ञानं[5] च तद्व्यधे ॥ २७ ॥
कण्ठनाडीमुभयतो जिह्वानासागताः सिराः।
पृथक् चतस्रस्ताः सद्यो घ्नन्त्यसून्मातृकाह्वयाः ॥ २८ ॥
कृकाटिके शिरोग्रीवासन्धौ[6], तत्र चलं शिरः।
अधस्तात्कर्णयोर्निम्ने विधुरे श्रुतिहारिणी ॥ २९ ॥
फणावुभयतो घ्राणमार्गं श्रोत्रपथानुगौ।
अन्तर्गलस्थितौ वेधाद्गन्धविज्ञानहारिणौ ॥ ३० ॥
नेत्रयोर्बाह्यतोऽपाङ्गौ भ्रुवोः पुच्छान्तयोरधः।
तथोपरि भ्रुवोर्निम्नावावर्तावान्ध्यमेषु तु ॥ ३१ ॥
अनुकर्णं ललाटान्ते शङ्खौ सद्योविनाशनौ।
केशान्ते शङ्खयोरूर्ध्वमुत्क्षेपौ, स्थपनी पुनः ॥ ३२ ॥

---

१ 'शोफौ' इति चन्द्रः. २ 'र्व्यधे' इति चन्द्रः. ३ ('ठबन्धार्थावंसौ' इति चन्द्रः;) 'ठबद्धार्थावंसौ', 'ठसम्बद्धावंसौ' इति च पाठौ. ४ 'णाशो वै' इति पाठः. ५ 'कृत्यरसाज्ञानानि त' इति चन्द्रः. ६ 'सन्धी' इति पाठः.

भ्रुवोर्मध्ये, त्रयेऽप्यत्र शल्ये जीवेदनुद्धृते ।
स्वयं वा पतिते पाकात्सद्यो नश्यति तूद्धृते ॥ ३३ ॥
जिह्वाक्षिनासिकाश्रोत्रखचतुष्टयसङ्गमे ।
तालुन्यास्यानि चत्वारि स्रोतसां, तेषु मर्मसु ॥ ३४ ॥
विद्धः शृङ्गाटकाख्येषु सद्यस्त्यजति जीवितम् ।
कपाले सन्धयः पञ्च सीमन्तास्तिर्यगूर्ध्वगाः ॥ ३५ ॥
भ्रमोन्मादमनोनाशैस्तेषु विद्धेषु नश्यति ।
[1]अन्तरो मस्तकस्योर्ध्वं सिरासन्धिसमागमः ॥ ३६ ॥
रोमावर्तोऽधिपो नाम मर्म सद्यो हरत्यसून् ।
विषमं स्पन्दनं यत्र पीडिते रुक् च मर्म तत् ॥ ३७ ॥
मांसास्थिस्नायुधमनीसिरासन्धिसमागमः ।
स्यान्मर्मेति च तेनात्र सुतरां जीवितं स्थितम् ॥ ३८ ॥
बाहुल्येन तु निर्देशः षोढैवं मर्मकल्पना ।
प्राणायतनसामान्यादैक्यं वा मर्मणां मतम् ॥ ३९ ॥
मांसजानि दशेन्द्राख्यतलहृत्स्तनरोहिताः ।
शङ्खौ कटीकतरुणे नितम्बावंसयोः फले ॥ ४० ॥
अस्थ्न्यष्टौ
[2]स्नावमर्माणि त्रयोविंशतिराणयः ।
कूर्चकूर्चशिरोऽपाङ्गक्षिप्रोत्क्षेपांसबस्तयः ॥ ४१ ॥
[3]गुदापस्तम्भविधुरशृङ्गाटानि नवादिशेत् ।

---

१ 'अन्तरे म' इति पाठः. २ 'स्नायुम' इति पाठः. ३ 'गुदोऽप' इति चन्द्रः ।

मर्माणि धमनीस्थानि

सप्तत्रिंशत्सिराश्रयाः ॥ ४२ ॥

बृहत्यौ मातृका नीले मन्ये कक्षाधरौ फणौ ।
विटपे हृदयं नाभिः पार्श्वसन्धी स्तनाधरे[1] ॥ ४३ ॥
अपालापौ स्थपन्युर्व्यश्चतस्रो लोहितानि च ।
सन्धौ विंशतिरावर्तौ मणिबन्धौ कुकुन्दरौ ॥ ४४ ॥
सीमन्ताः कूर्परौ गुल्फौ कृकाट्यौ जानुनी पतिः ।
मांसमर्म गुदोऽन्येषां, स्नान्नि[2] कक्षाधरौ तथा ॥ ४५ ॥
विटपौ विधुराख्ये च, शृङ्गाटानि सिरासु तु ।
अपस्तम्भावपाङ्गौ च, धमनीस्थं न तैः स्मृतम् ॥ ४६ ॥
विद्धेऽजस्रमसृक्स्रावो मांसधावनवत्तनुः ।
पाण्डुत्वमिन्द्रियाज्ञानं मरणं चाशु[3] मांसजे ॥ ४७ ॥

मज्जान्वितोऽच्छो विच्छिन्नः

स्रावो रुक् चास्थिमर्मणि ।

आयामाक्षेपकस्तम्भाः स्नावजे[4]ऽभ्यधिकं[5] रुजा ॥ ४८ ॥
यानस्थानासनाशक्तिर्वैकल्यमथवाऽन्तकः ।
रक्तं सशब्दफेनोष्णं धमनीस्थे विचेतसः ॥ ४९ ॥
सिरामर्मव्यधे सान्द्रमजस्रं बह्वसृक्स्रवेत् ।
तत्क्षयात्तृड्भ्रमश्वासमोहहिध्माभिरन्तकः ॥ ५० ॥

---

१ 'स्तनान्तरे' इति पाठः. २ 'स्नान्नी' इति क्वचित्. ३ 'वाऽऽशु' इति पाठः. ४ 'स्नायुगेऽ' इति पाठः. ५ 'धिका रुजः' 'कं रुजः' इति पाठौ.

वस्तु शूकैरिवाकीर्णं रूढे च कुणिखञ्जता ।
बलचेष्टाक्षयः शोषः पर्वशोफश्च सन्धिजे ॥ ५१ ॥
नाभिशङ्खाधिपापानहृच्छृङ्गाटकबस्तयः ।
अष्टौ च मातृकाः सद्यो निघ्नन्त्येकोनविंशतिः[1] ॥ ५२ ॥
सप्ताहः परमस्तेषां[2] कालः कालस्य कर्षणे ।
त्रयस्त्रिंशदपस्तम्भतलहृत्पार्श्वसन्धयः ॥ ५३ ॥
कटीतरुणसीमन्तस्तनमूलेन्द्रबस्तयः ।
क्षिप्रापालापबृहतीनितम्बस्तनरोहिताः ॥ ५४ ॥
कालान्तरप्राणहरा मासमासार्धजीविताः ।
उत्क्षेपौ स्थपनी त्रीणि विशल्यघ्नानि, तत्र हि ॥ ५५ ॥
वायुर्मांसवसामज्जमस्तुलुङ्गानि शोषयन् ।
शल्यापाये विनिर्गच्छन् श्वासात्कासाच्च हन्त्यसून् ॥ ५५ ॥
फणावपाङ्गौ विधुरे[3] नीले मन्ये कृकाटिके ।
अंसांसफलकावर्तविटपोर्वीकुकुन्दराः ॥ ५७ ॥
सजानुलोहिताक्षाणि[4]कक्षाधृक्कूर्चकूर्पराः ।
वैकल्यमिति चत्वारि चत्वारिंशच्च कुर्वते ॥ ५८ ॥
हरन्ति तान्यपि प्राणान् कदाचिदभिघातवः ।
अष्टौ कूर्चशिरोगुल्फमणिबन्धा रुजाकराः ॥ ५९ ॥
तेषां विटपकक्षाधृगुर्व्यः कूर्चशिरांसि च ।

---

१ 'कोनविं' इति पाठः. २ 'परमं' इति चन्द्रः. ३ 'विधुरौ' इति पाठः. ४ 'ताख्याणि' इति पाठः.

द्वादशाङ्गुलमानानि
त्र्यङ्गुले मणिबन्धने ॥ ६० ॥
गुल्फौ च स्तनमूले च
ऽयङ्गुलं जानुकूर्परम् ।
अपानबस्तिहृन्नाभिनीलाः सीमन्तमातृकाः ॥ ६१ ॥
कूर्चश्शृङ्गाटकमन्याश्च त्रिंशदेकेन वर्जिताः ।
आत्मपाणितलोन्मानाः
शेषाण्यर्धाङ्गुलं वदेत् ॥ ६२ ॥
पञ्चाशत्षट् च मर्माणि, तिलव्रीहिसमान्यपि ।
इष्टानि मर्माण्यन्येषाम्
चतुर्धोक्ताः सिरास्तु याः ॥६३॥
तर्पयन्ति वपुः कृत्स्नं ता मर्माण्याश्रितास्ततः ।
तत्क्षतात्क्षतजात्यर्थप्रवृत्तेर्धातुसङ्क्षये ॥ ६४ ॥
वृद्धश्चलो रुजस्तीव्राः प्रतनोति समीरयन् ।
तेजस्तदुद्धृतं धत्ते तृष्णाशोषमदभ्रमान् ॥ ६५ ॥
स्विन्नस्रस्तश्लथतनुं हरत्येनं ततोऽन्तकः ।
वर्धयेत्सन्धितो गात्रं मर्मण्यभिहते द्रुतम् ॥ ६६ ॥
छेदनात्सन्धिदेशस्य सङ्कुचन्ति सिरा ह्यतः ।
जीवितं प्राणिनां तत्र रक्ते तिष्ठति तिष्ठति ॥ ६७ ॥
सुविक्षतोऽप्यतो जीवेदमर्मणि न मर्मणि ।
प्राणघातिनि जीवेत्तु कश्चिद्वैद्यगुणेन चेत् ॥ ६८ ॥

असमग्राभिघाताच्च सोऽपि वैकल्यमश्नुते ।
तस्मात्क्षारविषाग्न्यादीन् यत्नान्मर्मसु वर्जयेत् ॥ ६९ ॥
मर्माभिघातः स्वल्पोऽपि प्रायशो बाधतेतराम् ।
रोगा [1]मर्माश्रयास्तद्वत्प्रक्रान्ता यत्नतोऽपि च ॥ ७० ॥"

पञ्चमोऽध्यायः ।

अथातो विकृतिविज्ञानीयं शारीरं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।
"पुष्पं फलस्य धूमोऽग्नेर्वर्षस्य जलदोदयः ।
यथा भविष्यतो लिङ्गं रिष्टं मृत्योस्तथा ध्रुवम् ॥ १ ॥
([2]आयुष्मति क्रियाः सर्वाः सफलाः सम्प्रयोजिताः ।
भवन्ति भिषजां भूत्यै कृतज्ञ इव भूभुजि ॥
क्षीणायुषि कृतं कर्म व्यर्थं कृतमिवाधमे ।
[3]अयशो देहसन्देहं स्वार्थहानिं च यच्छति ॥
[4]तर्हीदानीं गतासूनां लक्षणं सम्प्रचक्षते ।
विकृतिः प्रकृतेः प्राज्ञैः प्रदिष्टा रिष्टसंज्ञया ॥)
अरिष्टं नास्ति मरणं दृष्टरिष्टं च जीवितम् ।
अरिष्टे रिष्टविज्ञानं न च रिष्टेऽप्यनैपुणात् ॥ २ ॥
केचित्तु तद्विधेत्याहुः स्थाय्यस्थायिविभेदतः ।

---

१ 'मर्माश्रितास्त' इति पाठः. २ ( ) केषुचित्पुस्तकेषु समुपलब्धा इमे श्लोकाः. ३ 'आयासादेह' इति पाठः. ४ 'तदिदानीं' इति पाठः.

दोषाणामपि बाहुल्याद्रिष्टाभासः समुद्भवेत् ॥ ३ ॥
स[1] दोषाणां शमे शाम्येत्स्थाय्यवश्यं तु मृत्यवे ।
रूपेन्द्रियस्वरच्छायाप्रतिच्छायाक्रियादिषु ॥ ४ ॥
अन्येष्वपि च भावेषु प्राकृतेष्वनिमित्ततः ।
विकृतिर्या समासेन रिष्टं तदिति लक्षयेत् ॥ ५ ॥
केशरोम निरभ्यङ्गं यस्याभ्यक्तमिवेक्ष्यते ।
यस्यात्यर्थं चले नेत्रे स्तब्धान्तर्गतनिर्गते ॥ ६ ॥
जिह्मे विस्तृतसङ्क्षिप्ते सङ्क्षिप्तविनतभ्रुणी ।
उद्भ्रान्तदर्शने हीनदर्शने नकुलोपमे ॥ ७ ॥
कपोताभे अलाताभे स्रुते लुलितपक्ष्मणी ।
नासिकाऽत्यर्थविवृता संवृता पिटिकाचिता ॥ ८ ॥
उच्छूना स्फुटिता म्लाना
यस्यौष्ठो यात्यधोऽधरः ।
ऊर्ध्वं द्वितीयः स्यातां वा पक्वजम्बूनिभावुभौ ॥ ९ ॥
दन्ताः सशर्कराः श्यावास्ताम्राः पुष्पितपङ्किताः ।
सहसैव पतेयुर्वा
जिह्वा जिह्मा विसर्पिणी ॥ १० ॥
शूना शुष्का गुरुः श्यावा लिप्ता सुप्ता सकण्टका ।
शिरः शिरोधरा वोढुं पृष्ठं वा भारमात्मनः ॥ ११ ॥
हनू वा पिण्डमास्यस्थं शक्नुवन्ति न यस्य च ।
यस्यानिमित्तमङ्गानि गुरूण्यति लघूनि वा ॥ १२ ॥

---

१ 'तद्दोषाणां' इति पाठः.

विषदोषाद्विना यस्य खेभ्यो रक्तं प्रवर्तते ।
उत्सिक्तं मेहनं यस्य वृषणावतिनिःसृतौ ॥ १३ ॥
अतोऽन्यथा वा यस्य स्यात्
सर्वे ते कालचोदिताः ।
यस्यापूर्वाः सिरालेखा बालेन्द्वाकृतयोऽपि वा ॥ १४ ॥
ललाटे बस्तिशीर्षे वा षण्मासान्न स जीवति ।
पद्मिनीपत्रवत्तोयं शरीरे यस्य देहिनः ॥ १५ ॥
प्लवते प्लवमानस्य षण्मासास्तस्य जीवितम्[1] ।
हरिताभाः सिरा यस्य रोमकूपाश्च संवृताः ॥ १६ ॥
सोऽम्लाभिलाषी पुरुषः पित्तान्मरणमश्नुते ।
यस्य गोमयचूर्णाभं चूर्णं मूर्ध्नि मुखेऽपि वा ॥ १७ ॥
सस्नेहं, मूर्ध्नि धूमो वा, मासान्तं तस्य जीवितम् ॥
मूर्ध्नि भ्रुवोर्वा[2] कुर्वन्ति सीमन्तावर्तका नवाः ॥ १८ ॥
मृत्युं स्वस्थस्य षड्रात्रात्त्रिरात्रादातुरस्य तु ।
जिह्वा श्यावा मुखं पूति सव्यमक्षि निमज्जति ॥ १९ ॥
खगा वा मूर्ध्नि लीयन्ते यस्य तं परिवर्जयेत् ।
यस्य स्नातानुलिप्तस्य पूर्वं शुष्यत्युरो भृशम् ॥ २० ॥
आर्द्रेषु सर्वगात्रेषु सोऽर्धमासं न जीवति ।
अकस्माद्युपद्वात्रे वर्णौ प्राकृतवैकृतौ ॥ २१ ॥
तथैवोपचयग्लानिरौक्ष्यस्नेहादि मृत्यवे ।

---

१ ('ण्मासं तस्य' इति चन्द्रः,) 'ण्मासांस्त', 'ण्मासात्तस्य' इति पाठाः. २ 'र्वा यस्य स्युः सी' इति पाठः.

यस्य स्फुटेयुरङ्गुल्यो नाकृष्टा न स जीवति ॥ २२ ॥
क्षवकासादिषु तथा यस्यापूर्वो ध्वनिर्भवेत् ।
ह्रस्वो दीर्घोऽति वोच्छ्वासः पूतिः सुरभिरेव वा ॥ २३ ॥
आप्लुतानाप्लुते काये यस्य गन्धोऽतिमानुषः ।
मलवस्त्रव्रणादौ वा वर्षान्तं तस्य जीवितम् ॥ २४ ॥
भजन्तेऽत्यङ्गसौरस्याद्यं यूकामक्षिकादयः ।
त्यजन्ति वाऽतिवैरस्यात्सोऽपि वर्षं न जीवति ॥ २५ ॥
सततोष्मसु गात्रेषु शैत्यं यस्योपलक्ष्यते ।
शीतेषु भृशमौष्ण्यं वा स्वेदः स्तम्भोऽप्यहेतुकः ॥ २६ ॥
यो जातशीतपिटिकः शीताङ्गो वा विदह्यते ।
उष्णद्वेषी च शीतार्तः स प्रेताधिपगोचरः ॥ २७ ॥
उरस्यूष्मा भवेद्यस्य जठरे चातिशीतता ।
भिन्नं पुरीषं तृष्णा च यथा प्रेतस्तथैव सः ॥ २८ ॥
मूत्रं पुरीषं निष्ठ्यूतं शुक्रं वाऽप्सु निमज्जति ।
निष्ठ्यूतं बहुवर्णं वा यस्य मासात्स नश्यति ॥ २९ ॥
घनीभूतमिवाकाशमाकाशमिव यो घनम् ।
अमूर्तमिव मूर्तं च मूर्तं चामूर्तवत्स्थितम् ॥ ३० ॥
तेजस्व्यतेजस्तद्वच्च शुक्लं कृष्णमसच्च सत् ।
अनेत्ररोगश्चन्द्रं च बहुरूपमलाञ्छनम् ॥ ३१ ॥
जाग्रद्रक्षांसि गन्धर्वान् प्रेतानन्यांश्च तद्विधान् ।
रूपं व्याकृति तत्तच्च यः पश्यति स नश्यति ॥ ३२ ॥
सप्तर्षीणां समीपस्थां यो न पश्यत्यरुन्धतीम् ।

ध्रुवमाकाशगङ्गां वा स न पश्यति तां समाम् ॥ ३३ ॥
मेघतोयौघनिर्घोषवीणापणववेणुजान्।
श्रृणोत्यन्यांश्च यः शब्दानसतो न सतोऽपि वा ॥ ३४ ॥
निष्पीड्य कर्णौ श्रृणुयान्न यो धुकधुकास्वनम्।
तद्वद्गन्धरसस्पर्शान् मन्यते यो विपर्ययात् ॥ ३५ ॥
सर्वशो वा न यो, यश्च दीपगन्धं न जिघ्रति।
विधिना यस्य दोषाय स्वास्थ्यायाविधिना रसाः ॥ ३६ ॥
यः पांसुनेव कीर्णाङ्गो योऽङ्गे घातं न वेत्ति वा।
अन्तरेण तपस्तीव्रं योगं वा विधिपूर्वकम् ॥ ३७ ॥
जानात्यतीन्द्रियं यश्च तेषां मरणमादिशेत्।
हीनो दीनः स्वरोऽव्यक्तो यस्य स्याद्गद्गदोऽपि वा ॥ ३८ ॥
सहसा यो विमुह्येद्वा विवक्षुर्न स जीवति।
स्वरस्य दुर्बलीभावं हानिं च बलवर्णयोः ॥ ३९ ॥
रोगवृद्धिमयुक्त्या च दृष्ट्वा मरणमादिशेत्।
अपस्वरं भाषमाणं प्राप्तं मरणमात्मनः ॥ ४० ॥
श्रोतारं चास्य शब्दस्य दूरतः परिवर्जयेत्।
संस्थानेन प्रमाणेन वर्णेन प्रभयाऽपि वा ॥ ४१ ॥
छाया विवर्तते यस्य स्वप्नेऽपि प्रेत एव सः।
आतपादर्शतोयादौ या संस्थानप्रमाणतः ॥ ४२ ॥
छायाऽङ्गात्सम्भवत्युक्ता प्रतिच्छायेति सा पुनः।
वर्णप्रभाश्रया या तु सा छायैव शरीरगा ॥ ४३ ॥
भवेद्यस्य प्रतिच्छाया च्छिन्ना भिन्नाऽधिकाऽऽकुला।

विशिरा द्विशिरा जिह्वा विकृता यदि वाऽन्यथा ॥ ४४ ॥
तं समाप्तायुषं विद्यान्न चेल्लक्ष्यनिमित्तजा।
प्रतिच्छायामयी यस्य न चाक्ष्णीक्ष्येत कन्यका ॥ ४५ ॥
खादीनां पञ्च पञ्चानां छाया विविधलक्षणाः ।
नाभसी निर्मलाऽऽनीला सस्नेहा सप्रभेव च ॥ ४६ ॥
वाताद्रजोऽरुणा श्यावा भस्मरूक्षा हतप्रभा ।
विशुद्धरक्ता त्वाग्नेयी दीप्ताभा दर्शनप्रिया ॥ ४७ ॥
शुद्धवैदूर्यविमला सुस्निग्धा तोयजा सुखा ।
स्थिरा स्निग्धा घना शुद्धा श्यामा श्वेता च पार्थिवी ॥४८॥
वायवी[1] रोगमरणक्लेशायान्याः सुखोदयाः ।
प्रभोक्ता तैजसी सर्वा, सा तु सप्तविधा स्मृता ॥ ४९ ॥
रक्ता पीता सिता श्यावा[2] हरिता पाण्डुराऽसिता ।
तासां याः स्युर्विकासिन्यः स्निग्धाश्च विमलाश्च याः ॥५०॥
ताः शुभा, मलिना रूक्षाः सङ्क्षिप्ताश्चा[3]शुभोदयाः ।
वर्णमाक्रामति च्छाया प्रभा वर्णप्रकाशिनी ॥ ५१ ॥
आसन्ने लक्ष्यते छाया विकृष्टे भा प्रकाशते ।
नाच्छायो नाप्रभः कश्चिद्विशेषाश्चिह्नयन्ति तु ॥ ५२ ॥
नृणां शुभाशुभोत्पत्तिं काले छायासमा[4]श्रयाः ।
निकषन्निव यः पादौ च्युतांसः परिसर्पति ॥ ५३ ॥

---

१ 'वायव्या' इति चन्द्रः. २ 'श्यामा' इति पाठः. ३ 'श्चा-सुखोदयाः' इति पाठः. ४ 'छायाप्रभाश्रयाः' इति सुयुक्तश्वरकोक्तः पाठः.

हीयते बलतः शश्वद्योऽन्नमश्नन् हितं बहु ।
योऽल्पाशी बहुविण्मूत्रो बह्वाशी चाल्पमूत्रविट् ॥ ५४ ॥
यो वाऽल्पाशी कफेनार्तो दीर्घं श्वसिति चेष्टते ।
दीर्घमुच्छ्वस्य यो ह्रस्वं निःश्वस्य परिताम्यति ॥ ५५ ॥
ह्रस्वं च यः प्रश्वसिति व्याविद्धं स्पन्दते भृशम् ।
शिरो विक्षिपते कृच्छ्राद्योऽञ्चयित्वा प्रपाणिकौ ॥ ५६ ॥
यो ललाटात्स्रुतस्वेदः श्लथसन्धानबन्धनः ।
उत्थाप्यमानः संमुह्येद्यो बली दुर्बलोऽपि वा ॥ ५७ ॥
उत्तान एव स्वपिति यः पादौ विकरोति च ।
शयनासनकुड्यार्यो[1]ऽसदेव जिघृक्षति ॥ ५८ ॥
अहास्यहासी सम्मुह्यन् यो लेढि दशनच्छदौ ।
उत्तरौष्ठं परिलिहन्[2] फूत्कारांश्च करोति यः ॥ ५९ ॥
यमभिद्रवति च्छाया कृष्णा पीताऽरुणाऽपि वा ।
भिषग्भेषजपानान्नगुरुमित्रद्विषश्च ये ॥ ६० ॥
वशगाः सर्व एवैते विज्ञेयाः समवर्तिनः ।
([3]ग्रीवाललाटहृदयं यस्य स्विद्यति शीतलम् ॥ ६१ ॥
उष्णोऽपरः प्रदेशश्च शरणं तस्य देवताः ।)
[[4]पूर्वरूपाणि सर्वाणि ज्वरा[5]दिष्वतिमात्रया ।
यं विशंति विशत्येनं मृत्युर्ज्वरपुरःसरः ॥]

---

१ 'देर्यः सदैव' इति पाठः. २ 'हन्नुद्गारांश्च' ('हन्नोत्का' चन्द्रः) पाठाः. ३ ( ) चिन्हितः श्लोकः अरुणचन्द्रयोरसंमतः. ४ [ ]श्लोकोऽयं क्वचित्पठ्यते. ५ 'ज्वरोक्तान्यति' इति पाठः.

योऽऽणुज्योतिरनेकाग्रो दुश्छायो दुर्मनाः सदा ॥ ६२ ॥
बलिं बलिभृतो यस्य प्रणीतं नोपभुञ्जते ।
निर्निमित्तं च यो मेधां शोभामुपचयं श्रियम् ॥ ६३ ॥
प्राप्नोत्यतो वा विभ्रंशं स प्राप्नोति यमक्षयम् ।
गुणदोषमयी यस्य स्वस्थस्य व्याधितस्य वा ॥ ६४ ॥
यात्यन्यथात्वं प्रकृतिः षण्मासान्न स जीवति ।
भक्तिः शीलं स्मृतिस्त्यागो बुद्धिर्बलमहेतुकम् ॥ ६५ ॥
षडेतानि निवर्तन्ते षड्भिर्मासैर्मरिष्यतः ।
मत्तवद्गतिवाक्कम्पमोहा मासान्मरिष्यतः ॥ ६६ ॥
नश्यत्यजानन् षडहात्केशलुञ्चनवेदनाम् ।
न याति यस्य चाहारः कण्ठं कण्ठामयादृते ॥ ६७ ॥
प्रेष्याः प्रतीपतां यान्ति प्रेताकृतिरुदीर्यते ।
यस्य निद्रा भवेन्नित्या[1] नैव वा न स जीवति ॥ ६८ ॥
वक्त्रमापूर्यतेऽश्रूणां स्विद्यतश्चरणौ भृशम् ।
चक्षुश्चाकुलतां याति यमराज्यं गमिष्यतः ॥ ६९ ॥
यैः पुरा रमते भावैररतिस्तैर्न जीवति ।
सहसा जायते यस्य विकारः सर्वलक्षणः ॥ ७० ॥
निवर्तते वा सहसा, सहसा स विनश्यति ।
ज्वरो निहन्ति बलवान् गम्भीरो दैर्घरात्रिकः ॥ ७१ ॥
सप्रलापभ्रमश्वासः क्षीणं शूनं हतानलम् ।
अक्षामं सक्तवचनं रक्ताक्षं हृदि शूलिनम् ॥ ७२ ॥

---

१ 'नित्यं' इति अरुणः.

सशुष्ककासः पूर्वाह्णे योऽपराह्णेऽपि वा भवेत्।
बलमांसविहीनस्य श्लेष्मकाससमन्वितः ॥ ७३ ॥
रक्तपित्तं भृशं रक्तं कृष्णमिन्द्रधनुष्प्रभम्।
ताम्रहारिद्रहरितं रूपं रक्तं प्रदर्शयेत् ॥ ७४ ॥
रोमकूपप्रविसृतं कण्ठास्यहृदये सजत्।
वाससोऽरञ्जनं पूति वेगवच्चाति भूरि च ॥ ७५ ॥
वृद्धं पाण्डुज्वरच्छर्दिकासशोफातिसारिणम्।
कासश्वासौ ज्वरच्छर्दितृष्णातीसारशोफिनम् ॥ ७६ ॥
यक्ष्मा पार्श्वरुजानाहरक्तच्छर्द्यंसतापिनम्।
छर्दिर्वेगवती मूत्रशकृद्गन्धिः सचन्द्रिका ॥ ७७ ॥
सास्रविट्पूयरुक्कासश्वासवत्यनुषङ्गिणी।
तृष्णाऽन्यरोगक्षपितं बहिर्जिह्वं विचेतनम् ॥ ७८ ॥
मदात्ययोऽतिशीतार्तं क्षीणं तैलप्रभाननम्।
अर्शांसि पाणिपन्नाभिगुदमुष्कास्यशोफिनम् ॥ ७९ ॥
हृत्पार्श्वाङ्गरुजाच्छर्दिपायुपाकज्वरातुरम्।
अतीसारो यकृत्पिण्डमांसधावनमेचकैः ॥ ८० ॥
तुल्यस्तैलघृतक्षीरदधिमज्जवसासवैः।
मस्तुलुङ्गमषीपूयवेसवाराम्बुमाक्षिकैः ॥ ८१ ॥
अतिरक्तासितस्निग्धपूत्यच्छघनवेदनः।
कर्बुरः प्रस्रवन् धातून् निष्पुरीषोऽथवाऽतिविट् ॥ ८२ ॥

---

१ 'वाससो रञ्जनं'—वस्त्ररागकृत् इति चन्द्रः. २ 'जिह्मचे' इति पाठः. ३ 'तसम्' इति पाठः. ४ 'ष्कामिशो' इति पाठः.

तन्तुमान् मक्षिकाक्रान्तो राजीमांश्चन्द्रकैर्युतः ।
शीर्णपायुवलिं [1]मुक्तनालं पर्वास्थिशूलिनम् ॥ ८३ ॥
स्रस्तपायुं बलक्षीणमन्नमेवोपवे[2]शयन् ।
सतृट्श्वासज्वरच्छर्दिदाहानाहप्रवाहिकः ॥ ८४ ॥
अश्मरी शूनवृषणं बद्धमूत्रं रुजार्दितम् ।
मेहस्तृड्दाहपिटिकामांसकोथातिसारिणम् ॥ ८५ ॥
पिटिका मर्महृत्पृष्ठस्तनांसगुद[3]मूर्धगाः ।
पर्वपादकरस्था[4] वा मन्दोत्साहं प्रमेहिणम् ॥ ८६ ॥
सर्वं च मांससं[5]कोथदाहतृष्णामदज्वरैः ।
विसर्पमर्मसंरोधहिध्माश्वासभ्रमक्लमैः ॥ ८७ ॥
गुल्मः पृथुपरीणाहो घनः कूर्म इवोन्नतः ।
सिरानद्धो ज्वरच्छर्दिहिध्माऽऽध्मानरुजान्वितः ॥ ८८ ॥
कासपीनसहृल्लासश्वासातीसारशोफवान् ।
विण्मूत्रसङ्गहृश्वासशोफहिध्माज्वरभ्रमैः ॥ ८९ ॥
मूर्च्छाच्छर्द्यतिसारैश्च जठरं हन्ति दुर्बलम् ।
शूनाक्षं कुटिलोपस्थमुपक्लिन्नतनुत्वचम् ॥ ९० ॥
विरेच[6]नहृतानाहमानह्यन्तं पुनः पुनः ।
पाण्डुरोगः श्वयथुमान् पीताक्षिनखदर्शनम् ॥ ९१ ॥
तन्द्रादाहारुचिच्छर्दिमूर्च्छाध्मानातिसारवान् ।

---

१ 'मुक्तताल' ('गुक्तताडं' इति चन्द्रः), इति पाठः. २ 'शयेत्' इति चन्द्रः. ३ 'मूर्धजाः' इति चन्द्रः. ४ 'स्थाश्च म' इति पाठः. ५ 'क्लोच दा' इति क्वचित्. ६ 'नहता' इति क्वचित्.

अनेकोपद्रवयुतः पादाभ्यां प्रसृतो नरम् ॥ ९२ ॥
नारीं शोफो मुखाद्धन्ति कुक्षिगुह्यादुभावपि ।
राजीचितः स्रवंश्छर्दिज्वरश्वासातिसारिणम् ॥ ९३ ॥
ज्वरातिसारौ शोफान्ते श्वयथुर्वा तयोः क्षये ।
दुर्बलस्य विशेषेण जायन्तेऽन्ताय देहिनः ॥ ९४ ॥
श्वयथुर्यस्य पादस्थः परिस्रस्ते च पिण्डिके ।
सीदतः सक्थिनी चैव तं भिषक् परिवर्जयेत् ॥ ९५ ॥
आननं हस्तपादं च विशेषाद्यस्य शुष्यतः[1] ।
शूयेते[2] वा विना देहात्स मासाद्याति पञ्चताम् ॥ ९६ ॥
विसर्पः कासवैवर्ण्यज्वरमूर्च्छाङ्गभङ्गवान् ।
भ्रमास्यशोफ[3]हृल्लासदेहसादातिसारवान् ॥ ९७ ॥
कुष्ठं विशीर्यमाणाङ्गं रक्तनेत्रं हतस्वरम् ।
मन्दाग्निं जन्तुभिर्जुष्टं हन्ति तृष्णातिसारिणम् ॥ ९८ ॥
वायुः सुप्तत्वचं भुग्नं[4] कम्पशोफरुजातुरम् ।
वातास्रं मोहमूर्च्छायमदास्वप्नज्वरान्वितम् ॥ ९९ ॥
शिरोग्रहारुचिश्वाससङ्कोचस्फोटकोथवत् ।
शिरोरोगारुचिश्वासमोहविड्भेदतृड्भ्रमैः ॥ १०० ॥
घ्नन्ति सर्वामयाः क्षीणस्वरधातुबलानलम् ।
वातव्याधिरपस्मारी कुष्ठी रक्त्युदरी क्षयी ॥ १०१ ॥
गुल्मी मेही च तान् क्षीणान् विकारेऽल्पेऽपि वर्जयेत् ।

---

१ 'शुष्यति' इति पाठः. २ 'शूयन्ते' इति पाठः. ३ 'शोषहृ' इति पाठः. ४ 'भग्नं' इति पाठः.

बलमांसक्षयस्तीव्रो रोगवृद्धिररोचकः ॥ १०२ ॥
यस्यातुरस्य लक्ष्यन्ते त्रीन् पक्षान्न स जीवति ।
वाताष्ठीलाऽतिसंवृद्धा तिष्ठन्ती दारुणा हृदि ॥ १०३ ॥
तृष्णया नु परीतस्य सद्यो मुष्णाति जीवितम् ।
शैथिल्यं पिण्डिके वायुर्नीत्वा नासां च जिह्मताम् ॥ १०४॥
क्षीणस्या[1]यस्य मन्ये वा सद्यो मुष्णाति जीवितम् ।
नाभीगुदान्तरं गत्वा वङ्क्षणौ वा समाश्रयन् ॥ १०५ ॥
गृहीत्वा पायुहृदये क्षीणदेहस्य वा बली ।
मलान् बस्तिशिरो नाभिं विबध्य जनयन् रुजम् ॥ १०६ ॥
कुर्वन् वङ्क्षणयोः शूलं तृष्णां भिन्नपुरीषताम् ।
श्वासं वा जनयन् वायुर्गृहीत्वा गुदवङ्क्षणम् ॥ १०७ ॥
वितत्य पर्शु[2]काग्राणि गृहीत्वोरश्च मारुतः ।
स्तिमितस्याततातक्षस्य सद्यो मुष्णाति जीवितम् ॥ १०८ ॥
सहसा ज्वरसन्तापस्तृष्णा मूर्च्छा बलक्षयः ।
विश्लेषणं च सन्धीनां मुमूर्षोरुपजायते ॥ १०९ ॥
गोसर्गे वदनाद्यस्य स्वेदः प्रच्यवते भृशम् ।
लेपज्वरोपतप्तस्य दुर्लभं तस्य जीवितम् ॥ ११० ॥
प्रवालगुलिकाभासा यस्य गात्रे मसूरिकाः ।
उत्पद्याशु विनश्यन्ति न चिरात्स विनश्यति ॥ १११ ॥
मसूरविदलप्रख्यास्तथा विद्रुमसन्निभाः ।
अन्तर्वक्त्राः किणाभाश्च विस्फोटा देहनाशनाः ॥ ११२ ॥

---

१ 'स्यायस्य' इति पाठः. २ 'पार्श्वका' इति पाठः.

कामलाऽक्ष्णोर्मुखं पूर्णं शङ्खयोर्मुक्तमांसता ।
सत्रासश्चोष्णताऽङ्गे च यस्य तं परिवर्जयेत् ॥ ११३ ॥
अकस्मादनुधावच्च विघृष्टं त्वक्समाश्रयम् ।
[1][चन्दनोशीरमदिराकुणपध्वाङ्क्षगन्धयः ।
शैवालकुक्कुटशिखा[2]कुङ्कुमालमषीप्रभाः ॥
अन्तर्दाहा निरूष्माणः प्राणनाशकरा व्रणाः ।]
यो वातजो न शूलाय स्यान्न दाहाय पित्तजः ॥ ११४ ॥
कफजो न च पूयाय मर्मजश्च रुजे न यः ।
अचूर्णश्चूर्णकीर्णाभो यत्राकस्माच्च दृश्यते ॥ ११५ ॥
रूपं शक्तिध्वजादीनां सर्वांस्तान्वर्जयेद्व्रणान् ।
विण्मूत्रमारुतवहं कृमिणं च भगन्दरम् ॥ ११६ ॥
घट्टयन् जानुना जानु पादावुद्यम्य पातयन् ।
योऽपास्यति मुहुर्वक्त्रमातुरो न स जीवति ॥ ११७ ॥
दन्तैश्छिन्दन्नखाग्राणि तैश्च केशांस्तृणानि च ।
भूमिं काष्ठेन विलिखन् लोष्टं लोष्टेन ताडयन् ॥ ११८ ॥
हृष्टरोमा सान्द्रमूत्रः शुष्ककासी ज्वरी च यः ।
मुहुर्हसन् मुहुः क्ष्वेडन् शय्यां पादेन हन्ति यः ॥११९॥
मुहुश्छिद्राणि विमृशन्नातुरो न स जीवति ।
मृत्यवे सहसाऽऽतस्य तिलकव्यङ्गविप्लवः ॥ १२० ॥
मुखे, दन्तनखे पुष्पं, जठरे विविधाः सिराः ।

---

१ [ ] इति सार्धः श्लोकः केषुचित्पुस्तकेषु सङ्ग्रहे चोपलभ्यते. २ 'खानक्तमाल', 'खाकुन्दशालिमयप्रभाः' इति पाठौ.

ऊर्ध्वश्वासं गतोष्माणं शूलोपहतवङ्क्षणम् ॥ १२१ ॥
शर्म चानधिगच्छन्तं बुद्धिमान् परिवर्जयेत् ।
विकारा यस्य वर्धन्ते प्रकृतिः परिहीयते ॥ १२२ ॥
सहसा सहसा तस्य मृत्युर्हरति जीवितम् ।
यमुद्दिश्यातुरं वैद्यः संम्पादयितुमौषधम् ॥ १२३ ॥
यतमानो न शक्नोति दुर्लभं तस्य जीवितम् ।
विज्ञातं बहुशः सिद्धं विधिवच्चावचारितम् ॥ १२४ ॥
न सिध्यत्यौषधं यस्य नास्ति तस्य चिकित्सितम् ।
भवेद्यस्यौषधेऽन्ने वा कल्प्यमाने विपर्ययः ॥ १२५ ॥
अकस्माद्वर्णगन्धादेः स्वस्थोऽपि न स जीवति ।
निवाते सेन्धनं यस्य ज्योतिश्चाप्युपशाम्यति ॥ १२६ ॥
आतुरस्य गृहे यस्य भिद्यन्ते वा पतन्ति वा ।
अतिमात्रममत्राणि दुर्लभं तस्य जीवितम् ॥ १२७ ॥
यं नरं सहसा रोगो दुर्बलं परिमुञ्चति ।
संशयप्राप्तमात्रेयो जीवितं तस्य मन्यते ॥ १२८ ॥
कथयेन्न च पृष्टोऽपि दुःश्रवं मरणं भिषक् ।
गतासोर्बन्धुमित्राणां न चेच्छेत्तं चिकित्सितुम् ॥ १२९ ॥
यमदूतपिशाचाद्यैर्यत्परासुरुपास्यते ।
घ्नद्भिरौषधवीर्याणि तस्मात्तं परिवर्जयेत् ॥ १३० ॥
आयुर्वेदफलं कृत्स्नं यदायुर्ज्ञे प्रतिष्ठितम् ।

---

१ 'वाऽन' इति क्वचित्. २ 'संवर्तयितु' इति पाठः. ३ 'येन्नैव पृ' इति पाठः.

रिष्टज्ञानादृतस्तस्मात्सर्वदैव भवेद्भिषक् ॥ १३१ ॥
मरणं प्राणिनां दृष्टमायुःपुण्योभयक्षयात्।
तयोरप्यक्षयाद्दृष्टं विषमापरिहारिणाम् ॥ १३२ ॥"

षष्ठोऽध्यायः।

अथातो दूतादिविज्ञानीयं शारीरं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।
"पाखण्डाश्रमवर्णानां सवर्णाः[1] कर्मसिद्धये।
त एव विपरीताः स्युर्दूताः कर्मविपत्तये ॥ १ ॥
दीनं भीतं द्रुतं त्रस्तं रूक्षामङ्गलवादिनम्।
शस्त्रिणं दण्डिनं षण्ढं[2] मुण्डश्मश्रुजटाधरम् ॥ २ ॥
अमङ्गलाह्वयं क्रूरकर्माणं मलिनं स्त्रियम्।
अनेकं व्याधितं व्यङ्गं रक्तमाल्यानुलेपनम् ॥ ३ ॥
तैलपङ्काङ्कितं जीर्णविवर्णार्द्रैकवाससम्।
खरोष्ट्रमहिषारूढं काष्ठलोष्टादि[3]मर्दिनम् ॥ ४ ॥
नानुगच्छेद्भिषग्दूतमाह्वयन्तं च दूरतः।
अशस्तचिन्तावचने नग्ने छिन्दति भिन्दति ॥ ५ ॥
जुह्वाने पावकं पिण्डान् पितृभ्यो निर्वपत्यपि।
सुप्ते मुक्तकचेऽभ्यक्ते रुदत्यप्रयते[4] तथा ॥ ६ ॥
वैद्ये दूता मनुष्याणामागच्छन्ति मुमूर्षताम्।

---

१ 'सपक्षाः क' इति पाठः. २ 'खण्डं' इति पाठः. ३ 'लोहादि' इति पाठः. ४ 'तेऽथवा' इति पाठः.

विकारसामान्यगुणे देशे कालेऽथवा भिषक् ॥ ७ ॥
दूतमभ्यागतं दृष्ट्वा नातुरं तमुपाचरेत् ।
स्पृशन्तो नाभिनासास्यकेशरोमनखद्विजान् ॥ ८ ॥
गुह्यपृष्ठस्तनग्रीवाजठरानामिकाङ्गुलीः ।
कार्पासबुससीसास्थिकपालमुशलोपलम् ॥ ९ ॥
मार्जनीशूर्पचैलान्तभस्माङ्गारदशातुषान् ।
रज्जुपानत्तुलापाशमन्यद्वा भग्नविच्युतम् ॥ १० ॥
तत्पूर्वदर्शने दूता व्याहरन्ति मरिष्यताम् ।
तथाऽर्धरात्रे मध्याह्ने सन्ध्ययोः पर्ववासरे ॥ ११ ॥
षष्ठीचतुर्थीनवमीराहुकेतूदयादिषु ।
भरणीकृत्तिकाऽऽश्लेषापूर्वाऽऽर्द्रापैत्र्यनैर्ऋते ॥ १२ ॥
यस्मिंश्च दूते ब्रुवति वाक्यमातुरसंश्रयम् ।
पश्येन्निमित्तमशुभं तं च नानुव्रजेद्भिषक् ॥ १३ ॥
तद्यथा विकलः प्रेतः प्रेतालङ्कार एव वा ।
छिन्नं दग्धं विनष्टं वा तद्वादीनि वचांसि वा ॥ १४ ॥
रसो वा कटुकस्तीव्रो गन्धो वा कौणपो महान् ।
स्पर्शो वा विपुलः क्रूरो यद्वाऽन्यदपि तादृशम् ॥ १५ ॥
तत्सर्वमभितो वाक्यं वाक्यकालेऽथवा पुनः ।
दूतमभ्यागतं दृष्ट्वा नातुरं तमुपाचरेत् ॥ १६ ॥
हाहाक्रन्दितमुत्क्रुष्टमाक्रुष्टं स्खलनं क्षुतम् ।
वस्त्रातपत्रपादत्रव्यसनं व्यसनीक्षणम् ॥ १७ ॥

---

१ 'साक्षिके' इति पाठः. २ 'विद्युतम्' इति पाठः.

चैत्यध्वजानां पात्राणां पूर्णानां च निमज्जनम्।
हतानिष्टप्रवादाश्च दूषणं भस्मपांसुभिः ॥ १८ ॥
पथश्छेदोऽहिमार्जारगोधासरठवानरैः।
दीप्तां प्रति दिशं वाचः क्रूराणां मृगपक्षिणाम् ॥ १९ ॥
कृष्णधान्यगुडोदश्विल्लवणासवचर्मणाम्।
सर्षपाणां वसातैलतृणपङ्केन्धनस्य च ॥ २० ॥
क्लीबक्रूरश्वपाकानां जालवागुरयोरपि।
छर्दितस्य पुरीषस्य पूतिदुर्दर्शनस्य च ॥ २१ ॥
निःसारस्य व्यवायस्य कार्पासादेररेरपि।
शयनासनयानानामुत्तानानां तु दर्शनम् ॥ २२ ॥
न्युब्जानामितरेषां च पात्रादीनामशोभनम्।
पुंसंज्ञाः पक्षिणो वामाः स्त्रीसंज्ञा दक्षिणाः शुभाः ॥२३॥
प्रदक्षिणं खगमृगा यान्तो, नैवं श्वजम्बुकाः।
अयुग्माश्च मृगाः शस्ताः
शस्ता नित्यं च दर्शने ॥ २४ ॥
चाषभासभरद्वाजनकुलच्छागबर्हिणः।
अशुभं सर्वथोलूकबिडालसरटेक्षणम् ॥ २५ ॥
प्रशस्ताः कीर्तने कोलगोधाहिशशजाहकाः।
न दर्शने न विरुते, वानरर्क्षावतोऽन्यथा ॥ २६ ॥
धनुरैन्द्रं च लालाटमशुभं, शुभमन्यतः।
अग्निपूर्णानि पात्राणि भिन्नानि विशिखानि च ॥ २७ ॥
दध्यक्षतादि निर्गच्छद्वक्ष्यमाणं च मङ्गलम्।

वैद्यो मरिष्यतां वेश्म प्रविशन्नेव पश्यति ॥ २८ ॥
दूताद्यसाधु दृष्ट्वैवं त्यजेदार्तमतोऽन्यथा ।
करुणाशुद्धसन्तानो यत्नतस्तमुपाचरेत् ॥ २९ ॥
दध्यक्षतेक्षुनिष्पावप्रियङ्गुमधुसर्पिषाम् ।
यावकाञ्जनभृङ्गारघण्टादीपसरोरुहाम् ॥ ३० ॥
दूर्वार्द्रमत्स्यमांसानां लाजानां फलभक्षयोः ।
रत्नेभपूर्णकुम्भानां कन्यायाः स्यन्दनस्य च ॥ ३१ ॥
नरस्य वर्धमानस्य देवतानां नृपस्य च ।
शुक्लानां सुमनोवालचामराम्बरवाजिनाम् ॥ ३२ ॥
शङ्खसाधुद्विजोष्णीषतोरणस्वस्तिकस्य च ।
भूमेः समुद्धृतायाश्च वह्नेः प्रज्वलितस्य च ॥ ३३ ॥
मनोज्ञस्यान्नपानस्य पूर्णस्य शकटस्य च ।
नृभिर्धेन्वाः सवत्साया वडवायाः स्त्रिया अपि ॥ ३४ ॥
जीवञ्जीवकसारङ्गसारसप्रियवादिनाम् ।
हंसानां शतपत्त्राणां बद्धस्यैकपशोस्तथा ॥ ३५ ॥
रुचकादर्शसिद्धार्थरोचनानां च दर्शनम् ।
गन्धः सुसुरभिर्वर्णः सुशुक्लो मधुरो रसः ॥ ३६ ॥
गोपतेरनुकूलस्य[1] स्वनस्तद्वद्गवामपि ।
मृगपक्षिनराणां च शोभिनां शोभना गिरः ॥ ३७ ॥
छत्रध्वजपताकानामुत्क्षेपणमभिष्टुतिः ।
भेरीमृदङ्गशङ्खानां शब्दाः पुण्याहनिःस्वनाः ॥ ३८ ॥

---

१ 'नुलोमस्य' इति पाठः.

वेदाध्ययनशब्दाश्च सुखो वायुः प्रदक्षिणः ।
पथि वेश्मप्रवेशे च विद्यादारोग्यलक्षणम् ॥ ३९ ॥
इत्युक्तं दूतशकुनं
स्वप्नानूर्ध्वं प्रचक्षते ।
स्वप्ने मद्यं सह प्रेतैर्यः पिबन् कृष्यते शुना ॥ ४० ॥
स मर्त्यो मृत्युना शीघ्रं ज्वररूपेण नीयते ।
रक्तमाल्यवपुर्वस्त्रो यो हसन् ह्रियते स्त्रिया ॥ ४१ ॥
सोऽस्रपित्तेन
महिषश्ववराहोष्ट्रगर्दभैः ।
यः प्रयाति दिशं याम्यां मरणं तस्य यक्ष्मणा ॥ ४२ ॥
लता कण्टकिनी वंशस्तालो वा हृदि जायते ।
यस्य तस्याशु गुल्मेन
यस्य वह्निमनर्चिषम् ॥ ४३ ॥
जुह्वतो घृतसिक्तस्य नग्नस्योरसि जायते ।
पद्मं स नश्येत्कुष्ठेन
चण्डालैः सह यः पिबेत् ॥ ४४ ॥
स्नेहं बहुविधं स्वप्ने स प्रमेहेण नश्यति ।
उन्मादेन जले मज्जेद्यो नृत्यन् राक्षसैः सह ॥ ४५ ॥
अपस्मारेण यो मर्त्यो नृत्यन् प्रेतेन नीयते ।
यानं खरोष्ट्रमार्जारकपिशार्दूलसूकरैः ॥ ४६ ॥
यस्य प्रेतैः शृगालैर्वा स मृत्योर्वर्तते मुखे ।
अपूपशष्कुलीर्जग्ध्वा विबुद्धस्तद्विधं वमन् ॥ ४७ ॥

न जीवति

अक्षिरोगाय सूर्येन्दुग्रहणेक्षणम् ।
सूर्याचन्द्रमसोः पातदर्शनं दृग्विनाशनम् ॥ ४८ ॥
मूर्ध्नि वंशलतादीनां संभवो वयसां तथा ।
निलयो मुण्डता काकगृध्राद्यैः परिवारणम् ॥ ४९ ॥
तथा प्रेतपिशाचस्त्रीद्रविडान्ध्रगवाशनैः ।
सङ्गो वेत्रलतावंशतृणकण्टकसङ्कटे ॥ ५० ॥
श्वभ्रश्मशानशयनं पतनं पांसुभस्मनोः ।
मज्जनं जलपङ्कादौ शीघ्रेण स्रोतसा हृतिः ॥ ५१ ॥
नृत्यवादित्रगीतानि रक्तस्रग्वस्त्रधारणम् ।
वयोङ्गवृद्धिरभ्यङ्गो विवाहः श्मश्रुकर्म च ॥ ५२ ॥
पक्वान्नस्नेहमद्याशः प्रच्छर्दनविरेचने ।
हिरण्यलोहयोर्लाभः कलिर्बन्धपराजयौ ॥ ५३ ॥
उपानद्युगनाशश्च प्रपातः पादचर्मणोः ।
हर्षो भृशं प्रकुपितैः पितृभिश्चावभर्त्सनम् ॥ ५४ ॥
प्रदीपग्रहनक्षत्रदन्तदैवतचक्षुषाम् ।
पतनं वा विनाशो वा, भेदनं पर्वतस्य च[1] ॥ ५५ ॥
कानने रक्तकुसुमे पापकर्मनिवेशने ।
चितान्धकारसम्बाधे जनन्यां च प्रवेशनम् ॥ ५६ ॥
पातः प्रासादशैलादेर्मत्स्येन ग्रसनं तथा ।
काषायिणामसौम्यानां नग्नानां दण्डधारिणाम् ॥ ५७ ॥

१ 'वा' इति पाठः.

रक्ताक्षाणां च कृष्णानां दर्शनं जातु नेष्यते ।
कृष्णा पापाननाहारा[1] दीर्घकेशनखस्तनी ॥ ५८ ॥
विरागमाल्यवसना स्वप्ने कालनिशा मता ।
मनोवहानां पूर्णत्वात्स्रोतसां प्रबलैर्मलैः ॥ ५९ ॥
दृश्यन्ते दारुणाः स्वप्ना रोगी यैर्याति पञ्चताम् ।
अरोगः संशयं प्राप्य[2] कश्चिदेव विमुच्यते ॥ ६० ॥
दृष्टः श्रुतोऽनुभूतश्च प्रार्थितः कल्पितस्तथा ।
भाविको दोषजश्चेति स्वप्नः सप्तविधो मतः ॥ ६१ ॥
तेष्वाद्या निष्फलाः पञ्च यथास्वप्रकृतिर्[3]दिवा ।
विस्मृतो दीर्घह्रस्वोऽति[4]
पूर्वरात्रे चिरात्फलम् ॥ ६२ ॥
दृष्टः करोति तुच्छं च[5]
गोसर्गे तदहर्महत् ।
निद्रया वाऽनुपहतः[6] प्रतीपैर्वचनैस्तथा ॥ ६३ ॥
याति पापोऽल्पफलतां[7] दानहोमजपादिभिः ।
अकल्याणमपि स्वप्नं दृष्ट्वा तत्रैव यः पुनः ॥ ६४ ॥
पश्येत्सौम्यं शुभं तस्य शुभमेव फलं भवेत् ।
देवान् द्विजान् गोवृषभान् जीवतः सुहृदो नृपान् ॥६५॥

---

१ 'पा निराचारा' इति पाठः. २ 'गत्वा' इति पाठः, ३ 'थास्वं प्र' इति पाठः. ४ 'स्वो वा', 'स्वोऽपि' इति पाठौ. ५ 'वा' इति पाठः. ६ 'चानु' इति पाठः. ७ 'पोऽप्यफल' इति पाठः.

साधून् यशस्विनो वह्निमिद्धं स्वच्छान् जलाशयान् ।
कन्याः[1] कुमारकान् गौरान् शुक्लवस्त्रान्सुतेजसः ॥ ६६ ॥
नराशनं दीप्ततनुं[2] समन्ताद्रुधिरोक्षितम्[3] ।
यः पश्येल्लभते यो वा छत्रादर्शविषामिषम् ॥ ६७ ॥
शुक्लाः सुमनसो वस्त्रममेध्यालेपनं फलम् ।
शैलप्रासादसफलवृक्षसिंहनरद्विपान् ॥ ६८ ॥
आरोहेद्गोऽश्वयानं च, तरेन्नदह्रदोदधीन् ।
पूर्वोत्तरेण गमनमगम्यागमनं मृतम्[4] ॥ ६९ ॥
सम्बाधान्निःसृतिर्देवैः[5] पितृभिश्चाभिनन्दनम् ।
रोदनं पतितोत्थानं द्विषतां चावमर्दनम् ॥ ७० ॥
यस्य स्यादायुरारोग्यं वित्तं बहु च सोऽश्नुते ।
मङ्गलाचारसम्पन्नः परिवारस्तथाऽऽतुरः ॥ ७१ ॥
श्रद्दधानोऽनुकूलश्च प्रभूतद्रव्यसङ्ग्रहः ।
सत्त्वलक्षणसंयोगो भक्तिर्वैद्यद्विजातिषु ॥ ७२ ॥
चिकित्सायामनिर्वेदस्तदारोग्यस्य लक्षणम् ।
इत्यत्र जन्ममरणं यतः सम्यगुदाहृतम् ॥ ७३ ॥
शरीरस्य ततः स्थानं शारीरमिदमुच्यते ॥ ७३½ ॥"

---

१ 'कन्यां' इति सङ्ग्रहे पाठः. २ 'तनुः' इति पाठः.
३ 'क्षितः' सङ्ग्रहे इति पाठः. ४ 'भृतिम्' इति सङ्ग्रहे पाठः.
५ 'सङ्कटान्निः' इति पाठः.

अष्टाङ्गहृदयम् ।

निदानस्थानम् ।

प्रथमोऽध्यायः ।

अथातः सर्वरोगनिदानं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।
"रोगः पाप्मा ज्वरो व्याधिर्विकारो दुःखमामयः ।
यक्ष्मातङ्कगदाबाधाः शब्दाः पर्यायवाचिनः ॥ १ ॥
निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा ।
सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥ २ ॥
निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः ।
निदानमाहुः पर्यायैः
प्राग्रूपं येन लक्ष्यते ॥ ३ ॥
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः ।
लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम् ॥ ४ ॥
तदेव व्यक्ततां यातं रूपमित्यभिधीयते ।
संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः ॥ ५ ॥

हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम् ।
औषधान्नविहाराणामुपयोगं सुखावहम् ॥ ६ ॥
विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः ।
विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः ॥ ७ ॥
यथा दुष्टेन दोषेण यथा चानुविसर्पता ।
निर्वृत्तिरामयस्यासौ सम्प्राप्तिर्जातिरागतिः ॥ ८ ॥
सङ्ख्याविकल्पप्राधान्यबलकालविशेषतः ।
सा भिद्यते, यथाऽत्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति ॥ ९ ॥
दोषाणां समवेतानां विकल्पोंऽशांशकल्पना ।
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत् ॥ १० ॥
हेत्वादिकात्स्न्यावयवैर्बलाबलविशेषणम् ।
नक्तंदिनर्तुभुक्तांशैर्व्याधिकालो यथामलम् ॥ ११ ॥
इति प्रोक्तो निदानार्थः

तं व्यासेनोपदेक्ष्यति[१] ।
सर्वेषामेव रोगाणां निदानं कुपिता मलाः ॥ १२ ॥
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ।
अहितं[२] त्रिविधो योगस्त्रयाणां प्रागुदाहृतः ॥ १३ ॥
तिक्तोषणकषायाल्परूक्षप्रमितभोजनैः ।
धारणोदीरणनिशाजागरात्युच्चभाषणैः ॥ १४ ॥
क्रियातियोगभीशोकचिन्ताव्यायाममैथुनैः ।

---

१ 'सेनोपदेक्ष्यते' इति हेमाद्रिः, तोडरश्च. २ 'हितस्त्रिवि' इति चन्द्रः.

ग्रीष्माहोरात्रिभुक्तान्ते प्रकुप्यति समीरणः ॥ १५ ॥
पित्तं कट्वम्लतीक्ष्णोष्णपटुक्रोधविदाहिभिः ।
शरन्मध्याह्नरात्र्यर्धविदाहसमयेषु च ॥ १६ ॥
स्वाद्वम्ललवणस्निग्धगुर्वभिष्यन्दिशीतलैः ।
आस्यास्वप्नसुखाजीर्णदिवास्वप्नातिबृंहणैः ॥ १७ ॥
प्रच्छर्दनाद्ययोगेन भुक्तमात्रवसन्तयोः ।
पूर्वाह्णे पूर्वरात्रे च श्लेष्मा
द्वन्द्वं तु सङ्करात् ॥ १८ ॥
मिश्रीभावात्समस्तानां सन्निपातस्तथा पुनः ।
सङ्कीर्णाजीर्णविषमविरुद्धाध्यशनादिभिः ॥ १९ ॥
व्यापन्नमद्यपानीयशुष्कशाकाममूलकैः ।
पिण्याकमृद्यवसुरापूतिशुष्ककृशामिषैः ॥ २० ॥
दोषत्रयकरैस्तैस्तैस्तथाऽन्नपरिवर्तनात् ।
ऋतोर्दुष्टात्पुरोवाताद्ग्रहावेशाद्विषाद्गरात् ॥ २१ ॥
दुष्टान्नात् पर्वताश्लेषाद्ग्रहैर्जन्मर्क्षपीडनात् ।
मिथ्यायोगाच्च विविधात्पापानां च निषेवणात् ॥ २२ ॥
स्त्रीणां प्रसववैषम्यात्तथा मिथ्योपचारतः ।
प्रतिरोगमिति क्रुद्धा रोगाधिष्ठानगामिनीः ॥ २३ ॥
रसायनीः प्रपद्याशु दोषा देहे विकुर्वते ॥ २३½ ॥"

---

१ 'र्धनिदाघस' इति पाठः. २ 'अतिस्वप्न' इति क्वचित्.
३ 'वर्तत:', 'रिवृत्तित:' इति पाठौ क्वचित्.

द्वितीयोऽध्यायः ।

अथातो ज्वरनिदानं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥
"ज्वरो रोगपतिः पाप्मा मृत्युरोजोशनोऽन्तकः[1] ।
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः ॥ १ ॥
जन्मान्तयोर्मोहमयः सन्तापात्माऽपचारतः ।
विविधैर्नामभिः क्रूरो नानायोनिषु वर्तते ॥ २ ॥
स जायतेऽष्टधा दोषैः पृथङ्मिश्रैः समागतैः ।
आगन्तुश्च

मलास्तत्र स्वैः स्वैर्दुष्टाः प्रदूषणैः ॥ ३ ॥
आमाशयं प्रविश्याममनुगम्य पिधाय च ।
स्रोतांसि पक्तिस्थानाच्च निरस्य ज्वलनं बहिः ॥ ४ ॥
सह तेनाभिसर्पन्तस्तपन्तः सकलं वपुः ।
कुर्वन्तो गात्रमत्युष्णं[2] ज्वरं निर्वर्तयन्ति ते ॥ ५ ॥
स्रोतोविबन्धात्प्रायेण ततः स्वेदो न जायते ।
तस्य प्राग्रूपमालस्यमरतिर्गात्रगौरवम् ॥ ६ ॥
आस्यवैरस्यमरुचिर्जृम्भा सास्राकुलाक्षिता[3] ।
अङ्गमर्दोऽविपाकोऽल्पप्राणता बहुनिद्रता ॥ ७ ॥
रोमहर्षो विनमनं पिण्डिकोद्वेष्टनं क्लमः ।
हितोपदेशेष्वक्षान्तिः प्रीतिरम्लपटूषणे ॥ ८ ॥

---

१ 'त्युस्तेजो' इति चन्द्रः. २ 'त्रमाशुष्कं ज्व' इति पाठः. ३ 'लाक्षता' इति पाठः.

द्वेषः स्वादुषु भक्ष्येषु तथा बालेषु तृड् भृशम् ।
शब्दाग्निशीतवाताम्बुच्छायोष्णेष्वनिमित्ततः ॥ ९ ॥
इच्छा द्वेषश्च

तदनु ज्वरस्य व्यक्तता भवेत् ।
आगमापगमक्षोभमृदुतावेदनोष्मणाम् ॥ १० ॥
वैषम्यं तत्रतत्राङ्गे तास्ताः स्युर्वेदनाश्चलाः ।
पादयोः सुप्तता स्तम्भः पिण्डिकोद्वेष्टनं श्रमः ॥ ११ ॥
विश्लेष इव सन्धीनां साद ऊर्वोः कटीग्रहः ।
पृष्ठं क्षोदमिवाप्नोति निष्पीड्यत इवोदरम् ॥ १२ ॥
छिद्यन्त इव चास्थीनि पार्श्वगानि विशेषतः ।
हृदयस्य ग्रहस्तोदः प्राजनेनेव वक्षसः ॥ १३ ॥
स्कन्धयोर्मथनं बाह्वोर्भेदः पीडनमंसयोः ।
अशक्तिर्भक्षणे हन्वोर्जृम्भणं कर्णयोः स्वनः ॥ १४ ॥
निस्तोदः शङ्खयोर्मूर्ध्नि वेदना विरसास्यता ।
कषायास्यत्वमथवा मलानामप्रवर्तनम् ॥ १५ ॥
रूक्षारुणत्वगास्याक्षिनखमूत्रपुरीषता ।
प्रसेकारोचकाश्रद्धाविपाकास्वेदजागराः ॥ १६ ॥
कण्ठौष्ठशोषस्तृट् शुष्कौ च्छर्दिकासौ विषादिता ।
हर्षो रोमाङ्गदन्तेषु वेपथुः क्षवथोर्ग्रहः ॥ १७ ॥
भ्रमः प्रलापो घर्मेच्छा विनामश्चानिलज्वरे ।

---

१ 'क्लमः' इति पाठः. २ 'भिद्यन्त' इति सङ्ग्रहे. ३ 'पुश्वयथुः' इति पाठः.

युगपद्व्याप्तिरङ्गानां प्रलापः कटुवक्त्रता ॥ १८ ॥
नासास्यपाकः शीतेच्छा भ्रमो मूर्च्छा मदोऽरतिः ।
विट्स्रंसः पित्तवमनं रक्तष्ठीवनमम्लकः ॥ १९ ॥
रक्तकोठोद्गमः पीतहरितत्वं त्वगादिषु ।
स्वेदो निश्वासवैगन्ध्यमतितृष्णा च पित्तजे ॥ २० ॥
विशेषादरुचिर्जाड्यं स्रोतोरोधोऽल्पवेगता ।
प्रसेको मुखमाधुर्यं हृल्लेपश्वासपीनसाः ॥ २१ ॥
हृल्लासश्छर्दनं कासः स्तम्भः श्वैत्यं त्वगादिषु ।
अङ्गेषु शीतपिटिकास्तन्द्रोदर्दः कफोद्भवे ॥ २२ ॥
काले यथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा ।
निदानोक्तानुपशयो विपरीतोपशायिता ।
यथास्वं लिङ्गसंसर्गे ज्वरः संसर्गजः

अपि च ॥ २३ ॥

शिरोर्तिमूर्च्छावमिदाहमोह-
कण्ठास्यशोषारतिपर्वभेदाः ।
उन्निद्रतातृड्भ्रमरोमहर्षा
जृम्भातिवाक्त्वं च चलात्सपित्तात् ॥ २४ ॥
तापहान्यरुचिपर्वशिरोरुक्
पीनसश्वसनकासविबन्धाः ।
शीतजाड्यतिमिरभ्रमतन्द्राः
श्लेष्मवातजनितज्वरलिङ्गम् ॥ २५ ॥

---

१ 'थास्वलिङ्ग' इति पाठः.

शीतस्तम्भस्वेददाहाव्यवस्था
तृष्णाकासश्लेष्मपित्तप्रवृत्तिः[1] ।
मोहस्तन्द्रालिप्ततिक्तास्यता च
ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य ॥ २६ ॥

सर्वजो लक्षणैः सर्वैर्दाहोऽत्र च मुहुर्मुहुः ।
तद्वच्छीतं महानिद्रा दिवा जागरणं निशि ॥ २७ ॥
सदा वा नैव वा निद्रा महास्वेदोऽति[2] नैव वा ।
गीतनर्तनहास्यादिविकृतेहाप्रवर्तनम् ॥ २८ ॥
साश्रुणी[3] कलुषे रक्ते भुग्ने लुलितपक्ष्मणी ।
अक्षिणी पिण्डिकापार्श्वमूर्धपर्वास्थिरुग्भ्रमः[4] ॥ २९ ॥
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवाचितः ।
परिदग्धा खरा जिह्वा गुरुः[5] स्रस्ताङ्गसन्धिता ॥ ३० ॥
रक्तपित्तकफष्ठीवो लोलनं शिरसोऽतिरुक् ।
कोठानां श्यावरक्तानां मण्डलानां च दर्शनम् ॥ ३१ ॥
हृद्व्यथा मलसंसङ्गः प्रवृत्तिर्वाऽल्पशोऽति वा ।
स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता ॥ ३२ ॥
दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम् ।
सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम्[6] ॥ ३३ ॥
"वायुना कफरुद्धेन पित्तमन्तः प्रपीडितम् ।

---

१ 'ष्णा कासः श्ले' इति पाठः. २ ('महान् स्वे' इति चन्द्रः,) 'मुहुः स्वे' इति पाठः. ३ 'सस्रुते क' इति पाठः. ४ 'रुक् श्रमः' इति पाठः. ५ 'गुरुस्र' इति चन्द्रः. ६ 'हतौ' इति चन्द्रः.

व्यवायित्वाच्च सूक्ष्मत्वाद्बहिर्मार्गं प्रवर्तते ॥
तेन हारिद्रनेत्रत्वं सन्निपातोद्भवे ज्वरे ।"
दोषे विबद्धे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः ।
असाध्यः

सोऽन्यथा कृच्छ्रो भवेद्वैकल्यदोऽपि वा ॥३४॥
अन्यच्च[1] सन्निपातोत्थो यत्र पित्तं पृथक् स्थितम् ।
त्वचि कोष्ठेऽथवा दाहं विदधाति पुरोऽनु वा ॥ ३५ ॥
तद्वद्वातकफौ शीतं, दाहादिर्दुस्तरस्तयोः ।
शीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते ॥ ३६ ॥
शीते शान्तेऽम्लको मूर्च्छा मदस्तृष्णा च जायते ।
दाहादौ पुनरन्ते स्युस्तन्द्राष्ठीववमिक्लमाः[2] ॥ ३७ ॥
आगन्तुरभिघाताभिषङ्गशापाभिचारतः ।
चतुर्धा

अत्र क्षतच्छेददाहाद्यैरभिघातजः ॥ ३८ ॥
श्रमाच्च

तस्मिन्पवनः प्रायो रक्तं प्रदूषयन् ।
सव्यथाशोफवैवर्ण्यं, सरुजं कुरुते ज्वरम् ॥ ३९ ॥
ग्रहावेशौषधिविषक्रोधभीशोककामजः ।
अभिषङ्गात्

ग्रहेणास्मिन्नकस्माद्धासरोदने ॥ ४० ॥

---

१ 'अन्यश्च' इति चन्द्रः, सङ्ग्रहश्च. २ 'न्द्राष्ठेव', ('न्द्रास्वेदव' सं.मू.) इति पाठः.

ओषधीगन्धजे मूर्च्छा शिरोरुग्[1]वमथुः क्षवः ।
विषान्मूर्च्छातिसारास्यश्यावतादाहहृद्ग्रहाः[2] ॥ ४१ ॥
क्रोधात्कम्पः शिरोरुक् च
प्रलापो भयशोकजे ।
कामाद्भ्रमो[3]ऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः[4] ॥ ४२ ॥
ग्रहादौ सन्निपातस्य भयादौ मरुतस्त्रये ।
कोपः कोपेऽपि[5] पित्तस्य
यौ तु शापाभिचारजौ ॥ ४३ ॥
सन्निपातज्वरौ घोरौ तावसह्यतमौ[6] मतौ ।
तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते ॥ ४४ ॥
पूर्वं चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः ।
सदाहमूर्च्छैर्ग्रस्तस्य प्रत्यहं वर्धते ज्वरः ॥ ४५ ॥
इति ज्वरोऽष्टधा दृष्टः
समासाद्द्विविधस्तु सः ।
शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्बहिराश्रयः ॥ ४६ ॥
प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः ।
पूर्वं शरीरे शारीरे तापो, मनसि मानसे ॥ ४७ ॥
पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत् ।

---

१ 'रुक्श्वयथुः', 'रुग्वेपथुः' इति च क्वचित्. २ 'हृद्ग्रहाः' इति तोडरः. ३ 'मान्मोहोऽ' इति पाठः. ४ 'भीनिद्रा' इति हेमाद्रिः. ५ 'कोपे तु पि' इति चन्द्रः, तो. ६ 'वसाध्यत' पाठः.

दाहः पित्तयुते, मिश्रं मिश्रे

अन्तःसंश्रये पुनः ॥ ४८ ॥

ज्वरेऽधिकं विकाराः स्युरन्तः क्षोभो मलग्रहः ।
बहिरेव बहिर्वेगे तापोऽपि च सुसाध्यता ॥ ४९ ॥
वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ।
वैकृतोऽन्यः स दुःसाध्यः प्रायश्च प्राकृतोऽनिलात् ॥५०॥
वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् ।
कुर्यात् पित्तं च शरदि तस्य चानुबलं कफः ॥ ५१ ॥
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ।
कफो वसन्ते तमसि वातपित्तं भवेदनु ॥ ५२ ॥
बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ।
सर्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः ॥ ५३ ॥
ज्वरोपद्रवतीक्ष्णत्वमग्लानिर्बहुमूत्रता ।
न प्रवृत्तिर्न विड् जीर्णा न क्षुत्सामज्वराकृतिः ॥ ५४ ॥
ज्वरवेगोऽधिकं[1] तृष्णा प्रलापः श्वसनं भ्रमः ।
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥ ५५ ॥
जीर्णताऽऽमविपर्यासात्सप्तरात्रं च लङ्घनात् ।
ज्वरः पञ्चविधः प्रोक्तो मलकालबलाबलात् ॥ ५६ ॥
प्रायशः[2] सन्निपातेन भूयसा तूपदिश्यते ।
सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ॥ ५७ ॥
धातुमूत्रशकृद्वाहिस्रोतसां व्यापिनो मलाः ।

---

१ 'धिकस्तृष्णा' इति पाठः. २ 'प्रायः स सन्नि' इति पाठः.